त्तरविभक्तेर्विशेषणविभक्तित्वेन विशिष्टैककारकविधिसंभवः प्रकृते विशेषणविशेष्यभा
वाभावेनैवेषभ्याञ्चोभयविशिष्टविधिरिति भावः सूत्रे अपर्यायधातुभेदे भावनाभेदो धात्वर्थे
न भावनाया अवच्छेदस्य कृतत्वात् ॥ ॥एक॥ ॥ इदानीमिति पदस्य श्रुतिप्रतीतार्थमवलंब्य भेद
कत्वेन शब्दान्तरसामग्र्यादभ्यासस्येवेदानीं भेदकत्वं व्युत्पादनेन तु संख्यासंज्ञादेः तस्य विधिप
दस्यत्वाभावे न वाक्यगम्यसंबंधमपेक्ष्य भेदकत्वादिति भावः शब्दान्तराद्यवच्छिन्नेति अविशेषि श्रीराम: २२
तस्येति शब्दान्तरं तु धातुभेदेन विशेषितमिति भावः एवमादीत्यादिना इडो यजति बर्हिर्यजति स्वाहा

कारं यजतीति गृह्यते पूर्वविशेषण्यात्संगतिरित्यभिप्रेत्य श्लोकं व्याचष्टे प्रत्ययांशस्येति तटस्थः
शक्तेनान्वितिसमिद्धहूस्यसंज्ञात्वेपि न पादीनां कत्वं न पादीकर्मभेदावगमात्त्वाड्· न संज्ञात्वति
द्धिरभ्यासेन तु कर्मभेदे वगते तत्सिद्धिरित्यन्वयव्यतिरेकाभ्यां भवगमात्सो क्रशकेत्याह नेत्यादिना
संज्ञात्वाभावे तन्न न पादादिशब्दानां वैय्यर्थ्यं तत्राह देवता इति व्यतिरेकमुक्त्वान्वयमाह यदि हीतिया
गावगमादिति यागभेदावगमादित्यर्थः अथैष ज्योतिरित्यत्र यागशब्दाभावाद्यागभेदावगमे वि
नैव संज्ञात्वसिद्धिः स्यच्छाउभिदादौ तु धातुपरार्थी दिदोषाद्गुणविध्यसंभवादेव संज्ञात्वनिश्चयो
विनैव यागभेदज्ञाननिमित्तभावः नेनेति उपपदानां भेदज्ञानानौपयिकत्वेनेत्यर्थः अपोद्यस्यैत्य न
श्रीहृत्य नन्वेवमपि गुणादेव भेदं स्यादिति तटस्थस्यैवशंकां निराह नचेति दध्यादिवर्क्षिते वाक्यान
रोसन्नेग्निहोत्रे विधीयमान दधिप्रभृति वस्त्वित्यर्थः ननु तर्हि समिद्वाक्येपि गुणविधिः किं न स्या
न्नेत्राह समिध इति ननु मंत्रवर्णा देवताप्राप्तेर्नेगुणविधिरित्याह चेत्याह सत्यपीति एकसेवयागस्य मात्र
वर्णिकानेकदेवतालंबनेन स्तुतिमात्रपरत्वस्वीकारेण प्रवृत्तिविशेषकरत्वाभावेपीत्यर्थः न दोषः

श्रा॰
२३
23

नाग्नामा एवं प्रमारो यागस्य हृदप्रत्यभिज्ञानरूपं नेतुमितिः अन्यथयितुमित्यर्थः धात्वर्थभावयोरि
तिधात्वर्थभावनयोरित्यर्थः आनर्थक्यस्वीकारनिराकरणपरत्वेन पूर्वार्धं व्याचष्टे यन्नावदिति
बलवत्तेति यथा विद्धहुकादौ रूपालाभादित्यर्थः ननु प्रत्यभिज्ञैवात्र बाधिका तत्राह पत्विस्या
दिना नपुनरिति तच्छब्दाद्यभावादिति भावः गुणविधाननिराकरणार्थत्वेनोत्तरार्धं व्याचष्टे पद्
त्के मिति पदेति धात्वर्थस्य पदस्थ साभावनायाः अस्य पशुत्वेति ध्येयं दध्यादिवैषम्यमाह यदि
हीति दधिविशिष्टकर्मान्तरविधिनाश्रुत्यनुग्रहमाशंक्याह अनेकेति मंत्रवर्णेति तन्नूनयादस्मन्नाज्य
वेत्विसादीत्यर्थः तत्रैव एवं भेदिका दध्यादिवद्विधेयविशेषाभावादन्यथा हि वाक्यव्यर्थं स्यात् ॥ ॥
प्रक ॥ ॥ नाव ब्रूमो मितीदं वाक्यमुपांशुयाजस्य कालविधायकमिति दर्शमेव क्ष्यति एवं चास्य क
र्मो सन्निपरत्वाभावेन हि वाक्यबलाद् उपांशुयाजस्य विकृष्टाको पौर्णमासीपदेन फलवाक्ये च पूर्णमा
सपदेन पदेन परामर्शोत्फलसंबन्धसिद्धिरिति तदुपयोगितया व्योदाहरणं राजसूयवदिति स्वाराज्य
कामो राजसूयेन यजेतेति यजिना सन्निहितेष्टिपशुसोमयागवदित्यर्थः समेति भावप्रधाननिर्दे

श्रौ॰एम:
२३

शान्त्स्य मंत्रप्राधान्यं तेषामिति । विग्रहास्तु हिं गोपपत्तिः एवं संयुक्तो एवं शाहू संयुक्तोऽग्निनिमित्तेति
कालसंयोगान्निमित्ते सर्गः एवं संज्ञयोः पौर्णमास्यमावास्यासंज्ञयोः तत्रैव इति सार्वविभक्तिकस्तसि
ल्वा त्रैधोद्वत्र हननस्य काशाकपक्ष्युक्ते अग्निहोत्राणि लं सोमसेते ऋचौ हधन्व तो आग्नेः प्रत्ते
न सोमगीमिश्रिते तेहत्रिपका शाकपक्ष्युक्ते ऋचौ विधातं लब्धं वार्त्रघ्नी इत्यादिना रूपलाभपक्षे रूप
श्राद्धे देवतामात्रपरः यदि वार्त्रघ्नी इत्यादिना आग्नेयादिवाक्यैर्वा रूपं लभ्यते तदा विहृद्वाक्यद्वयस्यापि वि
धायकत्वे फलवाक्यस्य यजिना सर्वेषां परामर्शात् कालसंयुक्तानामकालसंयुक्तानां च सर्वेषां
प्राधान्यं यदि तु न लभ्यते तदा विहृद्वाक्यद्वयस्य विधायकत्वात् कालसंयुक्तकर्मानुवादकत्वे सति त
द्बलेन कालसंयुक्तानामेव फलसंबंधात् प्राधान्यमितरेषां तदंगत्वमिति फलपलिभावः विशेष
स्तु आग्नेयादिवाक्यै रूपलाभपक्षे तेषां कर्मविधायकत्वाभावात् द्विहृद्वाक्यविहितकर्मणोः प्रया
जादीनां च समप्राधान्यं वार्त्रघ्नी पौर्णमास्यामित्यादिवाक्यात् रूपलाभे त्वाग्नेयादिवाक्यानां कर्म
विधायकत्वात् द्विहृद्वाक्यविहितकर्मणोराग्नेयादीनां प्रयाजादीनां च समप्राधान्यमिति । तत्राग्नेय

शा॰
२४
24

दिवाक्ये रूपं विधातुं शक्यते नेत्येतन्मात्रार्थत्वेन संशयोत्तरमाह नतोपीति ननु समभ्याधान्यांगांगिभा
वविचारेण भेदलक्षणे संगतो न एवाग्नेयादिवाक्योदाहरणमप्ययुक्तं तत्राहाव चेति आदेवा
त्रैघ्नो इत्यादिमंत्रविधिबलात्कूपलाभमप्यालब्ध्य पूर्वपक्षयति तत्रेति विधिषु न श्रुत्यात्रन्यासेनेत्र सं
युक्तेति विशेषेण त्यादि: लिंगसामर्थ्यं न च नावांतरक्रियायोगाद्देते वाक्यप्रकल्पिता तानगुणाद्
घ्येकयं भावे रं हेति प्रकृताः क्रिया इत्युक्ते ईव्यस्य प्रकरणाख्यात्स्वत्वात्लिंगस्य स्वतोप्रमाणत्वा
त्तताभ्यां श्रोवान्यस्य तदंगत्वसिद्धिरिति शंक्य गृह्णातीत्युक्त यहणक्रियायाः प्रकरणाख्या
ख्यत्वान्यथानुपपत्त्यैव तत्संस्कार्यस्य श्रोवस्य तदंगत्वसिद्धेरिति भावः द्रव्येन प्रकरणाख्या
घमित्याग्रहेयाह वचनाद्धेमिने व वचनस्यैवेशाहुने विधिशक्तिप्रतिबंधः स्यादेतादर्थ्यं च तु थी
बलाद्यदाग्नेयद्वैत्यादौ प्रच्छन्नेनैव तेन तदप्रतिबंधादिति भावः मांत्रवर्णिकी ति अग्नीषोम श्री एमः
रूपेति घोषः नचवेवार्त्रघ्नीत्यादिवाक्यस्याज्यभागयोरनवाक्यत्वादस्यार्थत्वसत्त्वीयेवक्ष्यमा २४
णत्वान्तनहुलादेवतालाभ इति शंक्यं तत्रत्याग्नेयादीनां स्वक्रमाम्नातमंत्रैव रूढत्वान्नेषुके

५१ वं सोमदेवतांभावेन सोमदेवताकत्ववाक्यानुगतस्यासंभवाद्वाक्येन वाग्नेय्यादीनां विध्यसंभ
वात्सन्निधिनाप्यान्यभागांगत्वमंगीकृत्य वचनस्यानुवाक्यानुगतद्रव्यव्यवस्थार्थत्वं वक्ष्य
नेन चैतद्युक्तं विहिताक्यविहितकर्मद्वये मंत्रविधेर्बाधकाभावात् न चैतद्विधिबलादनुवाक्यायु
गलयोरेकैकस्य मंत्रस्य याज्यात्वप्राप्त्यावन्त्यन्तेऽस्य तु शास्त्रान्वयपपत्तिः प्रेषणश्चानात्रमाश्रित्य तदु
पपन्नेरिति भावः अन्ये तु न हि पौर्णमासममावास्याशब्दयोः संज्ञात्वसिद्धावाग्नेयादीनां काल
संयुक्तानामेव फलसंबंधसिद्धिः प्रयोजनं तेनयोः संज्ञात्वेपि फलवाक्यगतदर्शपूर्णमासशब्दयोः
संज्ञात्वासिद्ध्योक्तप्रयोजनासिद्धेः नापि समुदायद्वयसिद्ध्या तद्द्वारोक्तप्रयोजनसिद्धिः फल
वाक्ये दर्शपूर्णमासशब्दयोर्यजिसामानाधिकरण्यात्सर्वेषामपि यागानां फलसंबंधावगमा
त्समुदायस्यायागत्वेन तद्द्वारास्युक्तप्रयोजनासिद्धिरिति भावः उपपदार्थविधाने नापि न वि
धिपुनःश्रवणसार्थक्यमित्याशयेन समस्ते सूक्ते विहितत्वादिति न चाग्नेयादीनां सहप्रयोगा
र्थकालविधिः यदृश्यात्पश्वा सोमेन वा यजेत सोमावास्यायां पौर्णमास्यां वा यजेतेति कालविधा

शा. २५
25

वपि सर्वेष्वपि पशुसोमानां सह प्रयोगाभावेऽद्विहापि न दोषः सिद्धिरिति भावः संज्ञके इति कालविधानात्क्रा
क्रमहानिनिमित्तानिष्टयेपि सामानाधिकरण्यमात्रेणैव ज्योतिरित्यादिवत्संज्ञात्वं निश्चय इति
भावः विहितद्रव्यस्य कर्मान्तरविधायकत्वात् किं फलं सर्वेषां प्राधान्यमाह यदा चेदमिति दर्श
पूर्णमासाभ्यामितु उपपदेनाख्यातार्थावच्छेदात्कथं सर्वेषां फलसंबंधस्तत्राह न हीति अवच्छे
त्तुं व्यावर्तयितुं अत्र सिद्धेति अनेन च तुर्थेनाम्नः प्रसिद्धार्थत्वमंगीकृत्यापि तेनाख्यातस्य प्र
धानस्य न संकोचो यतः सर्वेषामाग्नेयादीनां समप्राधान्यमित्याशंक्य प्रसिद्धार्थेन नाम्नाकांस्य
भोजिन्यायेनाख्यातावच्छेदः संभवतीति कृत्वा यदीह न विहितद्रव्यस्य कर्मान्तरविधायकत्वात्प्रसि
द्धार्थकत्वमेव नास्तीति सर्वप्राधान्यमाशंक्य निराक्रियत इत्यपौनरुक्त्यं सम्वितं न तु दर्शपूर्ण
मासशब्दस्यास्ति कालयोगित्वप्रसिद्धिस्तत्राह कालेति न केवलं कालयोगः किंतु यागोप्यस्ती श्री एस:
त्यर्थः किं तेन तत्राह न तेषामिति समुदायेनेति समुदायद्वयेनेत्यर्थः असंभवमेवोपपादयितुं विकल्प २५
यति समुदायो हीति अत्रैवेति अस्मिन्वाक्य इत्यर्थः राजसूयवदिति व्याख्यातं प्राक् आग्नेय

तिनन्ताव्द्धितिएकावगतिरिति यथाहृक्षाणामेकदेशत्वेनेतिभावः आमिति फलवचनादित्यादिः प्राग
सिद्धिमेवाह यएव मित्यादिना अनंगीकारादिति आनर्थक्यदोषस्योक्तत्वादितिभावः द्वितीयमाशंक्या
नुपयोगेन दूषयति नत्वितिमाभूदुज्यभिधानप्रयुक्तासमुदायसिद्धिः दर्शपूर्णमासपदद्वयाभिधा
नप्रयुक्तातु स्यादित्यत्राह नचदर्शेति प्रत्येकत्वादिति समुदायद्वयसिद्धिः आकृतयोरप्रसिद्धत्वादिति
भावः नन्वाख्यातोधीनसिद्धिकावेव समुदायौ तदभ्यामभिधीयेयातां तत्राह नन्वाख्यातमिति न
नुसिद्धांतेद्रव्यसमुदायद्वयमाख्यातेन नत्वेरणपादीपतां तत्राह नचेति फलितमाह तदिदमिति
फलवाक्येपाजिनासमुदायद्वयस्यतन्त्रेणाभिधानासंभवस्तद्वयोर्थः इत्याविशेषादिति नचविहिद्वाक्य
विधिकर्मणोर्द्वित्वात्तयोरेवदर्शपूर्णमासपदेवेनेताभिनिवाच्यत्वात् तन्निमित्तस्याकालयोगस्यात्रेया
दिसाधारणत्वादिद्वेहाकेषांकेकस्यैककर्मणो विधानेनद्वित्वानवगमादित्याह सोदिपदाभ्यां पौर्णमास
मावास्यासंज्ञककर्मलक्षणायांमानाभावात् यस्तुतप्रदानत्वेनकर्मभेदस्यैवावगमात् अत एवा
ग्नेयवाक्याविहितान्नेयकर्मद्वयपरत्वमत्कृतत्रैकवाक्यविहितत्वेनद्वित्वावगमादित्याशंकामिति भा

श्रा०
२६
46

वः ननु सर्वेषां प्राधान्येपि राजसूयपदवाच्यजिनानां मंत्राभिधानकृतसमुदायमादायैकवचनमेव हि तत्वेनाभि
धानत्वमादित्यपि निरस्तमिति भावः ननु सर्वेषां प्राधान्येपि राजसूयवाच्यजिनानां मंत्राभिधानकृतसमु
दायैकत्वं स्यादिति सिद्धिवचनानुपपत्तिस्तदवापि तुल्यात्तत्राह नामधेयमपीति नन्वेतत्त्वात् प्रत्याख्यातप
रतंत्रत्वात् ननु कोरूपलाभस्तत्राह द्रव्यमिति कथंचिदिति वैशाह्य वर्तमाननिर्देशभंगलक्षेशः सूचितः
ननु वचनाद्यात्रेष्ट्यादिमंत्राणां विद्वद्वाक्यविहितकर्मांगतोक्ता तत्राह वचनं चेति श्रव्यवस्थायेति
पौर्णमास्याज्यभागयोरभावात् स्यायाममावास्याज्यभागयोरपि पौर्णमास्या प्राप्तेरव्यवस्थात्लाघ
वादिति विधेर्मंत्रप्रास्यं शेव्यापाराभावात् किं तु नियमांश एव व्यापारादिति भावः लिंगक्रेबाधस्याप्यु
पलक्षणमेतत् आनर्थक्यप्रसंगेन कालयुक्तानामेव प्राधान्यमिति फलमुपपादयति नवेति
य एवं विद्वान्पौर्णमासीं यजत इति वाक्ये यजिना पौर्णमासीमित्युपदेशात् पौर्णमासीकालयुक्ताया श्री० एष-
गास्तत्रेणानुवंधेनैतदनुवादरूपमेकमभिधानमवलंब्यते यामेकसमुदायोऽभिधीयते स एव समुदायः २६
पौर्णमासीमित्युपपदेनाभिधीयते धातुना तंत्राभिधानलब्धसमुदायस्योपपदेनाभिधानादुपप

रस्यैकवचनान्तत्वमप्युपपन्नमेवं चानुवादस्य समुदायसिद्धिः प्रयोजनमित्यनेनैव पाञ्जिकृतं
त्राभिधानलब्धसमुदायस्य पौर्णमासीयपदेनानुवादात् पौर्णमासीनाम सिद्धिरपि प्रयोजनं वै
श्वदेवेन यजेतेत्यत्रैवेति सूचितं एकादश इति य इत्येतिवाक्यैकवैषम्यं तत्रैव वक्ष्यामः इत्यर्थः इदा
मा ४ नीमग्न्यादिवाक्ये रूपलाभ इति पूर्वपक्षसमुत्थापयति इदानीमिति ननु प्रथमपूर्वपक्षप्रकारेणापि सर्वेषा
मपि विधायकानि भवन्तीत्याशंक्य तन्निविशेषमाह यागइति येयागानिति विहृद्भामयोर्विधायकत्व
सिद्ध्याद्वयोरपि पूर्वपक्षयोः आशयस्य प्राप्तोद्धितीयस्यातिशयार्थं इयमनु नन्वस्मदुक्ते हि विधिश्रवणप्रसं कृतेरिति–प्रसक्तस्य
गाद्यस्याभेदप्रसंगादिति यावत् ननु विशिष्टभावनाविधानान्न वाक्यभेद इत्याशंक्य तमेव प्रसंजयि
तुं विधेः स्वभावप्राप्तामर्थप्रतीतिमाह भावनास्य इति स्वयमसतः शब्दभावनात्मकविधेरर्थभावना
विषयकत्वाच्चावहुणविशिष्टभावनाविषयकत्वयाप्रथमं प्रतीयमानत्वस्यार्थः न हि स एव वाक्यार्थो
बाधकाभावादित्याशंक्यापि शब्दस्वाचिन बाधकमाह तादर्थ्येनेति नास्य सर्पेसर्पः तत्रत्वचेति यद्यद्द्रा
ममित्यादिः संक्रामतीति विपर्ययेसतीत्यर्थः नवः किं न दोषः इति नैष्ठ भावनायाः आमन्तपाविशे
त

ग्रा॰ ५७ षणीभूतगुणापरत्वे सहस्रश्रुतस्यानेकत्रापर्यवसानान्नाहि श्रेराहत्त्रिरवर्जनीयेत्यर्थः ननु विधिनात्वर्था
भावेपि विध्यन्वितत्वं यावद्गतो प्रमानभाव नान्वितत्वमात्रेण प्राप्तस्यापि विधेयत्वं किं न स्यात्तत्राह ना
न्य इति तस्य विधेर्देशा एव बहोशोयस्य सन्निहितो विधि समभिव्याहृतो विधिना सह यथा कथंचिदन्वित
त्वया प्रतीयमान इति यावत् तथा सति फलेपि प्रसंगाहितिभावः ननु एवमप्राप्तस्यापि कर्मणो गुणवि
शिष्टस्य विधौ विशेषणपर्यवसानार्थं विध्यावृत्तिदोषः स्यात्तत्राह न च दैति अर्थापत्तेति विशेष
णेन विनाविशिष्टासिद्धेरर्थापत्त्यैव विशेषणविधिसिद्धौ नश्रुतस्य विधेर्विशेषणे पृथक्पर्य
वसानं किंतु विशिष्ट एवेति नावृत्तिप्रसंग इत्यर्थः अनाक्षेपादिति गुणानां च परार्थत्वादिति
न्यायेनैकस्य तत्र विशेषणत्वाभावेनानाक्षेपादित्यर्थः क्वचित्प्राप्तेपि कर्मणि विशेषमाह विशे
षणान्वयीति क्रियान्वयात्प्रागेवेत्यन्वयः पशुनेति पशुपश्चोषोमीयवाक्यं पशुविशिष्टमेव या
गं विधत्ते तथा च पाशमकमनुवादेनानेकगुणविधौ नेदमुदाहरणं तथापि शास्त्रवानता अभिप्राय श्रीएम्ः
णेदमित्याहुः ननु प्रातिपदिकवचनविभक्त्यर्थानां जातिलिंगकारकाणामविनिगमनात् समस्ता ५७

27

धान्यमेवेति कथं विशिष्टाभिधानं तत्राह तत्वहीति कारकप्राधान्यं पश्वेकत्वाधिकरणे स्पष्टमिति भा-
वः ननु जात्यादीनामपूर्तानां कथं कारकता तत्राह प्रसिद्धेति प्रमाणान्तरेणेति अन्वयव्यतिरेका-
भ्यामेव जात्यादेराश्रयद्वारा कारकत्वस्य लोकसिद्धत्वादिति भावः अनेनैव त्र्यंगैरिति समासपदोपा-
दानस्यापि प्राप्तकर्मानुवादेन विशिष्टविधिरुपपादितः अन्यत्राप्याह भिन्नेति षष्ठ्यादेस्तूपलक्ष-
णेरेव स्वाधिकरणपूर्वपक्षे कृत्वाग्रहेनापि विशिष्टोपस्थितेर्वक्ष्यमाणत्वान्न षष्ठ्युदाहरणं तु कृत्वि-
ग्भ्यो दक्षिणां ददातीति विहितदक्षिणानुवादेन तस्य द्वादशशतं दक्षिणेति षष्ठ्या संख्याया विशिष्ट-
द्वादशशतसंख्याविधिरिति द्रष्टव्यं सामानाधिकरण्येन विशेषणानां संबंधमुदाहरति यथेति
चतुर्दश्याममावास्याभ्रमाद्दर्शोपक्रमे कृते पश्चाज्ज्ञाते चंद्रोदये सत्यकालोपक्रमदोषविहरणा-
र्थं यस्य हविर्निरुप्तमित्यादिना विहितेष्टिरभ्युदयेष्टिः शिपिभिः रश्मिभिर्विशिष्ट इति योगः अत्र
शिपिविष्टविष्ण्वोर्विशेषणविशेष्यभावसंबंधस्य मंत्रादिप्रसिद्धत्वात्तत्र विधिव्यापाराभावाद्यो विष्णुः
शिपिविष्टः स श्रुतस्य क्षोदिष्ठानां चरुदेवतेति स्मृतानुवादेन शिपिविष्टत्वविशिष्टदेवताविधानेपि न

शा॰
२८

वाक्यभेदइत्यर्थः सन्निहितेनेति समानविभक्तिकेनेत्यपि द्रष्टव्यं अरुणयेत्यादावरुणलजाते विना
लक्षणांद्वाक्यभेदासंभवेन लक्षणापि स्याद्यगन्वयः स्वीकृतः नेह तथेत्याशयेनश्रुतेवेत्युक्तं विधिं
विना संबंधसिद्धिमाह प्रसिद्धस्येति किमित्येविशेषोपरिवक्ष्यमाणस्य हविःक्षेशिपिविष्टो अस्मीत्यादि
मंत्रैः यः पशोर्भागधा यायपुष्टिमान्हिसः शिपिविष्टइत्यादिरर्थवादः परं तत्र कूत्रे शिपिविष्टस्योक्तत्वादिति पत्र पि४
रश्मिः शिपयोऽत्र रश्मयः पशवस्तेनैव विष्णो भवतीति निरुक्तमादिशब्दार्थः एकार्थ इति शिपिविष्टविष्णि
ष्टविष्णुरूपेत्यादिः आक्षिप्तेनेति आक्षेपश्चागतानदोषइति भावः प्रकृते तु विहितस्याग्निककर्मान्त
र्यानेकगुणविधौ विध्यावृत्तिः स्यादित्याह नत्वितीति विध्यावृत्तिप्रसंग इत्यन्वयः नन्वत्रापि सन्नि
हितसामानाधिकरण्यं शिपिविष्टादिवदस्तीत्याशंक्यवैलक्षण्यमाह यो यइत्यादिना गृहीतस्येति आ
ग्नेय इति देवतानवच्छिन्नस्येत्यर्थः प्रमाणांतरेति शिपिविष्टादौ मंत्रादितः प्रसिद्धेर्वैलक्षण्यमस्यापीति भा
वः नन्वग्निदेवताविशिष्टाष्टाकपालानुवादेन पौर्णमासीकर्मसंबंधमात्रविधानान्नावृत्तिरित्याशं श्री एम॰
क्याप्रसिद्धस्यानुवादायोगान्नैवमित्युक्तमेवोपपादयति नहीति आवृत्तिप्रकारं दर्शयत्यत इति स २८

त्रेपौर्णमासीपदलक्षितविहृताकाङ्क्षयेप्रकृतमेवकर्मजातंस्यात्कर्मान्तरविधौगौरवप्रापकवचनाभा

वात्॥ ॥पौर्णि॥ ॥विध्यनुवादविचिंतायाःप्रकृतासंगतिमाशंक्याह ततइति जामिसाहचर्य्यंपुनः

पुनःसदृशानुष्ठानेनतंद्रीतियावत् अन्वंचैनिरंतरेत्तु प्रारेवर्तितेत्रिरीयेप्रज्ञायतेनतुत्त्सवेदपुत्र

इतिप्राजापत्यंइदंविष्णुःप्रतद्विष्णुरितिवैष्णवमित्यादिरूपेणेत्यर्थः यद्यप्यैतरेयकेवैष्णवंयुगल

मास्तेपैङ्गमध्येआम्नायतेनत्वाग्नेयाग्नीषोमीयमध्येतथाप्याग्नेयाग्नीषोमीयपुरोडाशोपत्यत्राग्नी

षोमीयेत्यस्योपलक्षणार्थत्वान्नदोषः दर्शमिकेति नन्यायेनमैत्रावरुणीं कदेवतात्वाभविश्वादिवाक्या

न्नोविधापकत्वालंबनेनाक्षिप्यपूर्वपक्षोस्यानामितिर्बोध्यंइममेवार्थंविशदयन्फलफलि

भावमुपपादयति यदीति लिंगेति लिंगस्यसाधारण्येपिक्रमोधिक इतिभावः पूर्वपक्षमाह तत्रेति

अत्रेति अंतरावाक्यस्यार्थः ननु विश्वादिवाक्येयदिविधिस्तर्हियदष्टाकपालोभवतीत्यादावपिगु

णफलविधिःकिंनस्यादित्याशंक्यवैश्वानरवाक्यवैषम्योपिश्लोकस्यतात्पर्यंदर्शयन्व्याचष्टेवैश्वा

नरेति विधिस्सक्तेति भावनेतिपुरुषव्यापारेत्यर्थः निर्वापस्यातिदेशप्राप्तत्वेपिद्रव्यदेवतासंबंधाहि

शा·
२९

नविध्यर्हयागसत्त्वादित्यत्र कात्तं यैन कृतेवैस्यषम्यमाह इह त्विति विधित्वमध्यवसीयत इत्यनेनान्वयः न
न्वत्राप्यस्ति जामित्वोपक्रमा जामित्वोपसंहाराभ्यां मध्यवर्तिनामेकवाक्यत्वप्रतीतिरत्राह सत्यमिति
अन्तरावाक्ये विध्यश्रवणाद् द्विष्वादिवाक्येषु प्रतीतेरुद्विधिश्रवणाद्योक्षपतीति सत्रोऽंह बाध्येतिभावः
वाक्यभेदहेत्वंतरमाह जामित्वापत्तिप्रशंसेति न तस्य तन्त्रेव विधिशक्तिरुत्तम्यत इति प्रत्येकं विधिर्वाच्यो
न्यथाऽविधेयत्वजामित्वोक्तिर्वृथा स्यादिति भावः ननु जामिवाइति दोषस्य सङ्कीर्तनादेकवाक्यत्वमेव
न्याय्यं तत्राह जामिवाइति तेषां विधित्वोपपादनफलमाह सतिचेति अनुवादइति अन्तरापदं तु काल
विधायकमित्याऊः समुदायानुवादप्रयोजनं च तावद्भूतामरुनीषोमाविति कालविधायकवाक्यस्थे
नोपांशुपौर्णमास्यां यजन्निति पदेन सर्वेषां ग्रहणमन्यथा नाविरुग्नीषोमप्रतिपादकोपपदानुसा
रादग्नीषोमयागमात्रस्यैव ग्रहणं स्यात्सतिच समुदायानुवादेन द्वित्वान्समुदायीकृतानांत्रयाणा श्री एप:
मपि यागानाममनुवादो ग्नीषोमग्रहणं च सर्वदेवतोपलक्षणार्थं स्यात्तमश्च सर्वेषां कालविधौ ग्रह
णे सति फलवाक्येन ग्रहणात्सर्वेषां फलसंबंधः सिध्यतीति एवं च यथाविद्वद्वाक्ये समुदायानुवा २९

णाञ्जल्यवस्थानात्तयोरन्तरसंगतिर्बोध्या। एकमिति। वाक्यमित्यनेनान्वयः। नन्वपूर्वमानापदेशत्वादन्तरा २
दाहाग्नेयादीनां फलसंबंध एवमन्तरावाक्ये समुदायानुवादाद्धि छ्यवादियागानामपि कालसंबंध
इति वा तद्द्वारा फलसंबंध इति वा कथं न विधायकमित्युक्तं तत्राह अनूचीनेति अनूचीनत्वं निमि
त्तनामित्वकीर्तनादुपक्रमएवान्तरालयुक्तं तया किं विहितं विधित्सितमित्यवगमात्तदनुरोधेनान्तरावा
क्यस्यैव विधायकत्वं यजतीत्यस्य लेट्त्वं च सौकार्यमित्यर्थः अत एव छिम्बादि ग्रंथ साचगमो
सिद्ध इत्याहाना मित्वं चेति विधित्सितं स्यैव ग्रंथं साईत्वादिति भावः अत्रैकवाक्यत्वानुसरणेऽउ
पक्रमएवान्तरालयुक्तं विध्यवगमो मूलमित्यभिप्रायेणतदुपपादयन् परमनूचीनेत्यादि सार्धश्लोकमा
दौ व्याचष्टे जामिवाइति एतदुद्धार्थमेवाह नन्न मित्यादिना अंतरालकरणात् अंतरालकालेनुष्ठाना
त् प्राशित्रांसिषितं प्रशंसितुमिष्टं ननूपक्रम एव विधेयावगतान्तरावाक्ये विधिर्व्यर्थस्तत्राह किं तादि
ति तथा चान्नवगतो पांसुलगुणकया गविधानमर्थवदित्यर्थः एवमुपक्रमे न तरालयुक्तविधित्सावगमा
दितरत्र तदनवगमाद् दन्तरावाक्य एव विधिर्नेतरत्रेत्याशयेनाहीन्तरालसंयुक्तं स्थितियदुक्तं प्रशंसावगमा
द्वाक्यभेदमंगीकृत्य सादितदत एवापुक्तमित्याहान्तरालेचेति अन वल्कृमिमेव दर्शयति पुरोडाशेति

शा॰
३०
30

कलितमाह तस्मादिति विश्वादिवाक्येविध्ययोगादित्यर्थः यथा प्रयाजशब्दो न नामधेयं मन्त्रस्याद्य
भावात्किं तु गुणविधिरित्याशयेनाह सोपांशुगुणक इति उपलक्षितइति अन्तरालस्योपलक्षणत्वं
दशमेव्यक्तं प्रयोजनं तु पूर्वपक्षे विश्वादिदेवत्यास्त्रयो यागास्समुच्चित्यानुष्ठेयाः सिद्धान्ते त्वेक
एव विकल्पितविश्वादिदेवत्यः सत्रे पौर्णमासीं यजत इतिवद्देवतावाक्यमपि समुदायानुवादः
॥ ॥ आघारा ॥ ॥ इह दध्यादेरन्यतोऽप्राप्तेर्मन्त्रवर्णोऽप्राप्तविध्यापनुवादाहेत्त्र विश्वादिवाक्यानां
मिव प्रस्तावकत्वासंभवाद्विधायकत्वे सति दध्यादिविशिष्टकर्मविधानादग्निहोत्राद्विवास
मन्त्रवाद इत्युत्थानात्संगतिः पूर्वपक्षसौकर्यमाह निर्गुणमिति तत्सन्निधाविति अग्निहो
त्रवाक्यसन्निधौ दध्नेत्यादिवाक्यानि आघारवाक्यसन्निधौ ऊर्ध्वमित्यादीनीति विवेकः स
हेति अग्निहोत्रादिशब्दः पूर्वपक्षे दध्यादिवाक्योत्पन्नानां होमादीनां सह्या सिद्धान्ते तु स्वस्ववा
क्योत्पन्नकर्मण इति भेदः किमग्निहोत्रवाक्यमाघारवाक्यं च समुदायानुवादः उत विधिः न ह्यर्थ
वत्किं दध्याद्यूर्ध्वत्वादिवाक्यैर्गुणविशिष्टहोमा विधीयन्ते उत दध्याद्यूर्ध्वत्वादिगुणमात्रं विधी

श्री एम:
३०

यत इति संशयद्वयं संकल्प्याह किमिति विशिष्टहोमाधारविधौ प्रकृतहोमाद्याधारानुवादो गुणमा
त्रविधौ तु प्रकृतकर्माभावेनानुवादासंभवाद्विधिरिति फलफलिभावः गुणेति दध्यादिगुणविशिष्टा
होमात् जुहुयादित्यादिगुणविशिष्टाश्चाधारा इत्यर्थः अयमेवेति अग्निहोत्रं जुहोतीत्यादिरित्यर्थः इतरे
दध्ना जुहोतीत्यादयः प्रथमसंशयार्थः संशयान्तरमाह तदर्थमिति तन्नशाकं चेदग्निहोत्रादिवाक्यस
मुदायानुवादः शाकं चेत्तत्र कर्मविधिरितरेषु गुणविधय इति फलफलिभावः द्वितीयसंशयार्थं सं
शयान्तरमाह तथेति तन्नेति अत्र रूपशब्देन द्रव्यदेवतामन्त्रो ध्वर्तलादि साधारण्ये नानुरंजकमात्रं
विवक्षितं अनयोरिति अग्निहोत्राधारवाक्ययोरित्यर्थः विधानत्वं विधानं शाकं तन्त्वग्निहो
त्रसंज्ञकमिदं कर्मेति संज्ञयैव विशेषावगम इति भावः ननु दध्यादिवाक्येषु गुणविधानाद्विशेषावगमो
भविष्यति तत्राह यदा चैवमिति गुणविधौ विशेषावगमादग्निहोत्रादिवाक्ये कर्मविधिस्तद्विधौ च
ते गुणविधिरित्यन्योन्याश्रय इति भावः द्वितीयश्लोकं व्याचष्टे अपि चेति व्यापारएवेति अग्नि
होत्रादिरूप इत्यादिः नन्वेवं सति दध्यादिश्रवणानर्थक्यं तत्राह तद्विशेषणतयेति इत्यपेक्षावाह

इत्यत आह तथेति कर्मविशेषापरिज्ञाने कस्यपर्यवसितेसत्त्वानामसंज्ञया न विशेषावगम ४

श्रा॰ ३१ नचेति अग्न्युपयोगादिति नचोत्पन्नस्य कर्मणः फलादौ पुनर्विधानवदिह गुणविशिष्टतया पुनर्विधानं किं
न स्यादिति शंक्यं नचा सत्यस्यापि विधेः परिशेषादुत्पत्तिविधित्वापत्तेरुत्पत्तेश्च कर्मभेदकत्वान्न विहि
तविधानसंभवः इष्यते तु फलनिमित्तयोः कर्मविधिरधिकारविधिर्देशकालयोः कर्मविधिः प्रयोगवि
विनियोग ४ धिः संस्कार्ये कर्मविधिर्विधिरिति फलाद्यनुवादेयपच्च कस्थले उत्पत्तिविध्यभावान्न कर्मभेद इति
31 वैषम्यमिति भावः समुदायेति अत्रेदं बोध्यं दध्यादिवाक्येषु देवता न श्रूयते यदग्नये चेत्यादिषु द्रव्यं
न श्रूयते मंत्रविधिस्थले मांत्रवर्णिकदेवतालाभेऽपि न द्रव्यलाभः तथा चास्मिन्सर्वपक्षे दध्यादि
वाक्यविहितकर्मसु न क्वापि रूपद्वयलाभः एवं च दध्यादिवाक्योद्देशरहितं त्यागप्रक्षेपमात्रं विधीय वेदोद्दे ५
ते यदग्नये चेत्यादिषु त्वग्न्यादेर्द्रव्यसंबंधे सति मुख्यदेवतालाभसंभवाद्दध्यादौ नां चतुर्थ्यंतश
ब्देन निर्देशाद्रूपमुद्देशमात्रं विधीयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति मंत्रविधि
स्थलेऽपि मंत्रस्योच्चारणमात्रमेव विधेयं सर्वत्र जुहोतिसमत्वाद्विधेयेनाक्षणिकं तेषां समुदायोऽग्नि श्री एम:
होत्रवाक्येन दधीत्येतत्प्रयोजनं च सर्वेषामधिकारवाक्योपग्रहणमिमन्यथा यदग्नये चेत्यादिवाक्यविहि ३१

नाग्निसंबद्धकर्मण एवोपपदवशाद्ग्रहणं स्यान्न तु समुदायानुवादेन दानर्थक्यप्रसंगादित्यादेव
शाद्वत्स्यवृत्तसर्वकर्मणामग्निहोत्रशब्दो नामधेयमिति सर्वेषां फलसंबन्धसिद्धिरिति एवमिति
चतुर्गृहीतं वा एतदभूदस्याघारमाघारयेदिति प्रयाजाज्यरूपे संस्कार्ये आघारे विनियोजकवाक्ये सर्वेषां
ग्रहणमाघारणाक्ये प्रयोजनमित्यर्थः इतरत्राप्तिति अग्निहोत्रादिवाक्येष्वित्यर्थः अनेकेति सोमेन यजेते
त्यत्र तु कर्मणो श्रामत्वादगत्या विशिष्टविधिरिति भावः विधायकोविधिरित्यर्थः रूपानुपादानेन विशेषान
वगमादविधेयत्वमित्याद्युक्तमनूद्य परिहरति यद्यपीति अतिक्रम्येति सामान्यस्य विध्ययोगपत्वादि
तिभावः होमविशेष इति अन्यत्राविहितो यः कश्चिद्धोमविशेष इति ज्ञानमात्रेण विध्यर्हं तथा विवि
ध्यज्ञानानपेक्षणात्तो क्रान्तो न्याश्रय इति भावः अत एव वनमेह्लादु घटेत्याह लक्षितेनेति नस्यापि रूपा
न्नाभावात्पर्यवसानं तत्राह नस्य चेति नन्वव्यापारेणाविधेयस्तत्राह स्वरूपेणेति न तत्तथापि गुणस्य
साक्षाद्विधेयत्वाद्गुणविशिष्टकर्मैव विधेयमिति तु सन्निविधित्वादपस्या कर्मभेदः स्यादित्याशंक्य परिह
रति यद्यपीत्यादिना फलत इति तात्पर्यमित्यर्थः एवं च विधेः कर्मोत्पत्तिपरत्वाभावान्न कर्मभेदकत्वमि

ति भावः फलितमाह तेनेति प्रयोजनं पूर्वपक्षे दध्यादिवाक्यविधेयानां कर्मणां समुच्चितानुष्ठानं सि
द्धांते त्वेकस्मिन्नेव कर्मणि द्रव्याणां विकल्पान्न समुच्चयः तथा पूर्वपक्षे सायंप्रातर्वाक्ययोरपि
दध्यादिवाक्यवत्कर्मान्तरविधायकत्वेन दध्यादिवाक्यीयकर्मसु सायंप्रातःकालनियमाभावः
सिद्धांते तद्भावः आघारवाक्ये तु पूर्वपक्षे ऊर्ध्वत्वसाधनत्वादिमद्ध्येयस्य ध्यानस्यैकस्य कर्म
णः पुनः पुनरनुष्ठानं सिद्धांते तु कर्मभेदाभावाद्गुणानुसारेण प्रधानावृत्त्ययोगाद्गुणलोपः आघाराग्निहो
मात्रे सत्वे आघाराग्निहोत्रवाक्यमपि समुदायानुवादः ॥ ॥ इव्य ॥ ॥ दध्यादिवाक्य इव पशुसो
मवाक्ययोरपि न कर्मविधिरिति सूत्यानान्तर्गतिः आलभतीति आलभतिना स्पर्श एवानूद्यत इ
ति पक्षे स्थितत्वेन तद्दध्यादिवाक्यविहितकर्मप्रत्यभिज्ञानादालभतेः समुदायानुवादत्वं वा ध्य
ऐन्द्रवायवादीति आदिना मैत्रावरुणादिवाक्यानां तद्दध्यादिवाक्यानां च ग्रहः तद्दध्यादिवाक्येषु दे
वतानुक्तेर्यागविधित्वस्यासम्भवात्तदादौ सोमोदाहरणे पूर्वपक्षमाह तत्रेति याग एवेति याग एव वि
धातव्य एवेत्यन्वयः उद्दिश्य त्यागरूपस्य यागस्य ग्रहणानो क्षेपकत्वाद्ग्रहणस्यानुवादाद्योगात्त

स्यापि विधेयत्वावश्यंभावेन यथाश्रुतान्वयानुपपत्तेः ॥ ग्रहाणामिति केवलेग्रहणो विधीयमाने हि
द्रव्यसंबंधित्वेन श्रुतादेवतानावकल्पेत इत्यर्थः ॥ न च देवतेति देवतासंबंधिद्रव्यस्य द्वितीयावगतसा
ध्यत्वं संबंधस्य साध्यत्वे पर्यवसन्नं यागेन विना दुर्घटमित्यर्थः ॥ संस्कार्यत्वं द्वितीयार्थ इत्याशंक्या
ह न चेंद्रवायवमिति ग्रहाणामिति ग्रहणेन संस्कार्यमित्यर्थः ॥ तस्माद्द्रव्यदेवताभ्यां ग्रहणेन च विशि
ष्टो याग एव विधेय इत्याह ॥ तेनेति ॥ तेनेंद्रवायुदेवताविशिष्टेति ॥ इंद्रवायुप्रकाशकमंत्रेण ग्रहणेति
यथाग्रहणे स्वकरणमंत्रद्वारा ग्रहणसंबंधेंद्रवायुवैशिष्ट्यसंग्राहकस्य सेंद्रवायुसंबंधित्वं चोपपद्यत इति
भावः ॥ देवतायामेवेति ॥ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पत्यादिहमेधाश्चेति तेष्व
स्य यद्विधायकस्तत्र स्यासास्य देवत्वे स्वाधिकारे पठितत्वादिति भावः ॥ परिहरति ॥ मैवं दिशा हिनोतेत्या
स्त्विति देवतातद्धितस्य विशेषविहितत्वान्मरुत्वतीयाग्रहेष्वैरूप्यलाभाच्चान्यथात्वविशेषितसंबंधसा
मान्यस्यानुष्ठानानुपयोगादिति भावः ॥ सोमेति ॥ ततश्चेंद्रवायवादिवाक्यविहितयागेष्वपि हविष्ट्वेन सोम
विधानं सोमशब्दार्थस्य विधेयत्वाद्यजिरेवानुवादो न तु विधिर्द्वावप्येतन्नान्तरानुवाद इति सूचितं न तु

शा०
३२
33

सोमस्यरसोभावेष्याख्याधारयेतिगावोपपयस्त्रोरसरूपहविः प्रकृतित्वेनैवसोमविधिविस्यार्थंकेष्टाप्रत्या
हं यद्वेति दृष्टांतवैषम्यं शंकते नन्विति उपात्तार्थांवाक्यांतरप्राप्तार्थांतर्द्विषयत्वादिति ऐंद्रवायवमिति
द्रव्यसामान्यवाचिना ढितस्यसन्निहितरसपर्यवसानादिसर्थः विकृत्यनुवादेनप्रकृतिद्रव्यविधौ
हि विकृतिद्रव्यस्यप्राप्त्यपेक्षा न त्वेचमिहास्ति किं त्वर्थात्प्रकृतिद्रव्यविधिपर्यवसानमितिपरिहर
ति उच्यत इत्यादीति न च व्रीहिभिरिति न तस्य तत्र वाक्यांतरेण प्रयोगप्राप्तिस्तथापि मानव्रीहिविधा
वुपयुज्यत इति भावः ननु व्रीहिभिरिति करणविभक्त्याविहितं द्रव्यसंबंधावगमस्तत्राह व्रीहिभिरिति
चेति द्रव्येति विकृतिद्रव्येत्यर्थः क्रियायाश्चैवकरणत्वोदितिभावः कथंतर्हि व्रीहिभिर्यजेतेतिप्रकृ
मि ४ तिद्रव्यविधिरिति शंकितत्राह तेनेति अनुवादप्रयोजनमाह तस्यरव्येति ज्योतिष्टोमनामत्वेपिन्यायप्रा
मनामांतरस्यापरिहार्यत्वादितिभावः उक्तार्थेलिंगदर्शनमाह तथाचेति दशेति उपांश्वंतर्यामैंद्रवायव श्री रामः
मैत्रावरुणशुक्रमंथ्याग्रयणोक्थ्यध्रुवाश्विनादशग्रहाः आश्विनस्यपंचमत्वेनहोमेप्युपांश्वंतर्या ३२
मयोर्वषट्कारहोमत्वाद्वषट्कारहोमेषुतस्यान्तनीयत्वंबोध्यं आदिबापंचमाध्यांदिनेग्रहाणांतस्मा

देंइवायवः प्रतौ मैत्रावरुणो गृह्यत इत्यादिग्रहः क्रमेतिदेशस्तेनेनतृतीयषाड्ढेन हत्या च समुच्चयस्तौ
यप्रत्ययेन क्रमस्याप्रतीयत इति भावः अन्यथेति सोमवाकोपागविधाविति सर्थः ननु सोमवाकस्य यागा
विधायकत्वेपि देशोत्तानित्यादेः समुच्चयादिविधायकत्वे तोपपत्तेर्न क्रमसमुच्चयदर्शनानुपपत्तिरित्य
रुचेराह यद्विचेति गुणेति ग्रहगुणे त्यर्थः तेषामिति नक्षत्रोक्ता सोमपदस्य नामत्वपक्षे सोमवाकस्यैक
स्यैवानर्थक्यमिति विशेषः सवितेः नन्वभिषवकादिवाक्यैः सोमस्य रसभावापगमादृस्तविषयग्रहणा वि
धुपपत्तिस्तत्राह अभिषवादीति नन्वभिषवादीनां तत्वपक्षे र्थकर्मत्वमेव स्यान्नसंस्कारत्वमिति भावः अ
स्तु सोमवाके देवताविरहादरूपत्वादनुवादेनाग्नीषोमीयवासंहृव्यदेवतयोः सत्वादित्यत आह तत्रापा
हेवमिति अनर्थकानीति प्रकृतपशुसंस्कारकत्वाभावेन दर्शपूर्णमासेज्यावनीवत्सर्वस्य तद्दया पु
पोद्दानेनारादुपकारकावद्दानविधयः स्युरित्यत्र नासर्येन्नु प्राप्ते कर्मणि देवतायाः प्रधानस्वरूपं विधि
वीक्षमेदापत्तात्तत्राह पशुशब्द इति तेषामेवानुवादक इत्यन्वयः प्रकृतिवदिति प्रकृतिवाचकशब्देनल
क्षणयाभिधानादिति पर्यवसितोर्थः ननु तद्दयादिवाक्यैर्न यागविधिर्यज्यश्रवणाद्दवदानमात्रे वि

प्रा॰ ३४ धोयागाभावासप्रुवाक्ये देवताविधिरप्ययुक्तः स्यादिति शंकते न्कानीति तावंत इति हृदयादीनामुद्देश्य
त्वेनैक्ये न पशुशब्देनानुवादत्वं धर्मापि समाहित्यमविरक्षितमिति चात्येकं देवतान्वये द्रव्यदेवतासंबंधभे
34 दाद्यागभेद इति भावः साङ्गाम्येति पशुप्रभेदत्वसाम्यादिति भावः हृदयादीनामवदानसंबंधाद्यागसा
धनत्वलाभे दृष्टांतमाह अभिषवेति सोमाभावे पूतीकानभिषुणुयादित्यभिषवसंबंधात्पूतीकानां सोम
प्रतिनिधित्वेन यागसंबंधवदित्यर्थः एवं च यथा पूतीकवाक्ये पूतीकानां सोमप्रतिनिधित्वेन विधौ तद्वि
धिप्राप्तोभिषवसंबंधोनूद्यते न यथा हृदयादिवाक्येषु हृदयादिद्रव्यकयागविधौ चोदकप्राप्तावदानं
संबंधोनूद्यत इति भावः वेवस्कन्नस्कफलत्वमसोमत्र सद्यशोर्हदृष्टान्तः तमसोमभक्षं प्रयच्छेदिति यागीयद्रव्य
प्रतिपत्त्यर्थभक्षसंयोगेन फलत्वमसस्य यागसाधकत्वेन विधौ तद्विधिप्राप्तभक्षानुवादवदिति बोध्यं द्र
व्यांतरेणापि पशुसोमरूपद्रव्यांतरसंबंधेऽसति प्रत्यभिज्ञाविरहात् हृदयादिरूपरसरूपद्रव्यांतरावरुद्धे
शु२ पसोमलक्षणाद्व्यविधिसंभवाच्च एतोऽत्रालभतियजतौ यागविधौ द्रव्यविशिष्टयागविधावित्यर्थः श्रीराम:
अन्य इति हृदयस्याग्रे ऐंद्रवायवमित्यादय इत्यर्थः नतु पशुशब्दस्य हृदयादिषु पचारोक्तेर्नमित्तद्रव्यां ३४

नरसंयोगस्तत्राह पशुश्चाप्यत इति असंभव इति उत्सन्निशिषपश्वयरोधादिति भावः परिहरति पशोरिति द्वा
रेणास्य नेनन्तर्हयादिवाक्यानर्थक्यमिति निरस्तानतु अवधानासम्भुनेककरणेनतत्राह अएणा उत्पत्तिगोमयेनेति
गोमयपनुषयो व्रीहिद्वारा पाके यागस्यापूर्वद्वारा स्वर्गेकरणत्वादिति भावः एक इति द्रव्यैकत्वाधागेकत्व तु
यागबहुत्वाद्दोषं स्यादिति भावः सोमवाक्येपि द्रव्यान्तरसंयोगं दर्शयितुमादौ सोमस्य हविष्ट्वेन विधान प
क्षे द्रव्ययजितयेत्यादिना अशक्यो हेतुमाह धारयेति द्रव्यसामान्यवाचि तद्धितस्य धाएवाक्यसन्निहित द्रव
द्रव्यविषयत्वे वप्रवृत्तेरैंद्रवायवादिवाक्य एव द्रव्यविशेषलाभे गृह्णातिनात्रानियमेन द्रव्यानाक्षेपान्न
न्नियमविध्यसंभवादिति भावः प्राप्तिमिति सोमेन यजेतेत्यस्मात्प्रागित्यर्थः प्राप्तिं शंकते नन्विति न
नु धारावाक्यस्य सोमरसविषयत्वात्तत्सन्निधापित सोमरसविषयत्वमेंद्रवायवमिति तन्न तद्धितस्य भ
विष्यतितत्राह नचधारेति धारैर्याह्यस्य द्रव्यमात्रेण पर्यवसानेन रसविषयत्वं विनानुपपत्त्यभावादि
त्यर्थः सत्यपीति अभिषवादिवाक्यस्येत्यादिः ननु व्रीहीन्प्रोक्षतीति प्रकृतव्रीहिग्रहणावत्किं न स्यादत्
त्राह संस्कारेति कयंचिदस्यव्याख्यालक्षणयेति अस्मिन्पक्ष इति सोमेन यजेतेत्याहत्य सोमविधाना

शा॰ ३५ भावेन स्याग्रासेरभिषवत्वादिवाक्येस्तन्संस्कारविध्यनुपपत्तेरग्राह्यप्रकारकविधिः स्यादित्येतिन्नेषामेवप
कसोमविषयत्वाभावाद्द्वारा ग्रावस्याभिषवादिवाक्यसन्निहितसोमरसविषयत्वं दूरापेतमितिभावः ॥ आ
35 विशेषकत्वादितिप्रकरणाद्वातिकर्तव्यताकांक्षालक्षणेनस्यच विनियोगमात्रे व्यापार इतिनन स्यप
रविशेषणत्वमतो न तद्वाक्येषु प्रकृतं सोमं क्रीणातीति प्रकृतं सोममभिषुणोतीत्येवं प्रकरणाविशेषितसो
मग्रहणमित्यर्थः ॥ अधिकारादिति सान्निध्येरित्यर्थः तुल्येषु वाक्येष्वेकत्र सन्निधिः परत्र विशेषहेतुर्न
स्यात्तुल्यत्वे न विनिगमनाविरहादिति नावमिकाधिकरणे तत्रैव वक्ष्यते। इत्यर्थः ननु संस्कारविधित्वाभा
वेपि सन्निहितपरत्वं स्यादेवेष्वदेवीति वत्स्यान्तत्राह यदिहीति प्राभाकरैस्तु वार्तिकोक्तः प्रकृतिद्रव्यावि
धिस्वरूपक्षेणयुक्तः संस्कारवाक्येरेव सोमरसस्य प्राप्तेरित्युक्तं तदपि संस्कारवाक्यैः सोमरसप्राप्त्य
संभवोत्तरानिरस्तमित्याह एतेनेतिय द्येवनाभिषुयेयते न दाबाधकमाहतेषां द्वेतितत्त्वेवेतियथापूर्वपक्षे
ऐंद्रवायवादि न च्छिन्नस्य सोमं श्रावयतीत्यादिवाक्यसहितधारावाक्यप्राप्तसोमरसविषयत्वं तथैवमिहा श्री एम॰
नेपि नत्संभवादैंद्रवायवादिवाक्यैः सोमरसविशिष्टग्रहणविधौ सति देवतावद्द्रव्यस्यापितैरेव वाक्यैः प्रा ३५

मोसोमवाक्यं केवलयागविधायकं स्यात्सोमपदं च तत्र द्रव्यान्यायेन नामधेयं स्यादित्यर्थः ननु स्ववा
क्ये द्रव्यविधेः संभवति वाक्यांतरान्तरेणाभोनयुक्तमत आह अप्राप्तामिति तथा सति तत्र द्रव्यान्यायोच्छेदः
स्यादिति भावः तन्निराकरणार्थमिति सोमवाक्ये प्रकृतिद्रव्यविधानपक्षे द्रव्यांतरसंयोगाभावेन प्रथ
मतन्त्रेणतन्निराकरणासंभवादिति भावः एवं च पश्चदाहरणे पूर्वपक्षनिराकरणस्य प्रथमतन्त्रे
णैव शक्यतया प्रथमं तन्त्रे सिद्धांतउपपादित इति बोध्यं तेन तन्निराकरणप्रकारं विशदयति यदीति
यागे सोमवाक्यविहितयागे तन्मात्रेति अश्रुतयागकल्पनानन्याय्येति भावः ग्रहणाविधिमभिनय
ति ग्रहणेनेति ऐन्द्रवायवं इन्द्रवायुदेवत्यं। यागे तित्यापीत्यादिः ग्रहणस्य यागार्थत्वे सति यागद्वारा ग्रह
णेनैन्द्रवायवः कृतो भवतीति भावः तर्हि यागापेक्षायां मंत्रापेक्षा न तत्रैव तद्विधिरस्त्वत्यदाग्नेयवाक्यवन्न
नु वाक्यांतरेणेत्यत्राह आत इति यदाग्नेयवाक्ये पुरुषव्यापाराश्रवणेनाभिधानापर्यवसानात्तत्रैव यागक
ल्पना इह तु ग्रहणे रूपपुरुषव्यापारस्य श्रवणेनाभिधानपर्यवसानादभिहितद्रव्यदेवतासंबंधनिर्वाह
कापेक्षामात्रमित्यपेक्षितविधानार्थे सोमवाक्यमिति तत्र एवोपपत्तेर्नाश्रुतं कल्प्यमिति भावः। कमस

शा. ३६ 36

समुच्चयदर्शनानुपपत्तिं परिहरति दध्नेति सोमरसस्य नन्वल्पमात्रैरपि हीनापात्रान्तरेण कौऽस्य होमसं
भवात्स्वाभ्यासस्सिद्धिरतन्त्राह यद्यपीति अल्पपात्रेग्रहणस्यैवावदानवैश्याद्दानपर्यन्तेत्वादूह्य च समस्थाना
मेव होमसाधनत्वश्रवणाच्च नपात्रान्तरेण होम इति भावः पूर्वोदाहरणं तुच्छमेव स्पष्टमाणत्वदध्यादिस
मुच्चयानुपपत्तिबोधात्प्रयोजनं पूर्वपक्षे ऐन्द्रवायवादिवाक्यानां यागविधायकत्वेन सयागस्य
स्वाश्रयविनियुक्तदेवताकत्वाभावलक्षणाव्यक्तत्वाभावाद्ध्यग्निहोत्रादिषु व्यक्ताः सुसोम
स्यतिन्यायाप्रवृत्तिः सिद्धान्ते तु तत्प्रवृत्तिः पूर्वोदाहरणे तु पूर्वपक्षे यागभेदात् कृतिषु कस्यैव या
गस्योपकर्तव्यतापत्तिः ऐन्द्रवायवादिषु केनैव यागः सिद्धान्ते सर्वैः सत्रेपशुसोमयागस्यपोईव्यान्तरसंयो
गात्कर्मचोदनाप्रकरणप्रकृतत्वदध्याद्यैन्द्रवायवादिवाक्यविहितेयागेसति पशुसोमवाक्ययोर्द्र
व्यसंयोगानर्थक्यस्यातेनहितस्यगुणत्वासंभवः ॥ ॥२४॥ ॥उत्पन्नकर्मावबोधे न विधीय
मानासंख्यान कर्मभेदिका संख्याविधिवाक्ये कर्मोत्पन्नेभावे नोत्पत्तिविधिगम्यभेदस्याप्रसंगादतए ॥ श्री॰एगः ३६
वपयाजैकादशत्वादीनां न भेदकत्वमित्याशयेनाह कर्मोत्पत्तीति कर्मसमानाधिकरणेति कर्मवा

विंशादूसमानाधिकृतत्वशब्दवाच्येत्यर्थः अनेन दर्भपुंजीलैः पंचपत्नीत्यक्रमेण गतसंख्याव्यवच्छेदः अ
त्र चक्रमो त्सविशामगन लेनहोमगतत्वेन होमकाण्डविशेषेप्यंते नसमिधोपजनीत्यादिना मिसमिधो अ
ग्न्याज्यस्मोर्वितिमंत्रवर्णोग्निभेदेवतागतमनूद्यमानवत्त्वव्यवच्छिद्यते द्वादशेति द्वादशसंख्या
तान्प्रत्येकं द्वादशसंख्यायुक्तान् जुहोतीत्यर्थः ननु चतुष्कल्याविंशादधिकमानं होमाः संपद्यंते
सकृदिति सकृदुक्तस्यानेकैत्रव्यापारयोगात्सकृदुक्ताख्यातेन कर्मैकोवध्यते पदांतरगतासंख्या
भ्यासेनेत्र संपादनीयेत्यर्थः। एवं चाभ्यासस्याल्लेख्याख्यातस्य पुनः श्रुत्याक्रमभेदे पिनसंख्यास्य
लेसः पुनः श्रुत्याभावादित्युत्थानान्तं गतिः अभ्यासप्रतिष्ठायाः पञ्चसोमाधिकरणपर्यंतत्वा
त्तेनास्य पयकृसंगत्यपेक्षा अस्मादितिसंख्यावाचिपदसंबंधादित्यर्थः नन्वाख्यातादेव
सिद्धिरुक्ता तत्राह आख्यातेति विरोधिपदांतराभाव एव सकृदुक्ताख्यातात्कर्मैकासिद्धिर्न त्वत्र
तिस्त्व इति विरोधिपदसत्वान्न हि तत्पदमनपेक्ष्याख्यातमभिधानपर्यवसायि कर्मैक्यासिद्धिर्न त्वत्राति
स्व इति विरोधिपदसत्वान्न हि तत्पदमनपेक्ष्याख्यातमभिधाने) यीति भावः दृष्टांतं विघटयति एकाद

शेति निष्ठीतेति समिहादिविधिपंचकादिति भावः पूर्वैतइतियत्र युक्तमितियोजनाबहुत्वेन प्रथमप्रति
तिनत्वनुतद्धितस्यैकस्यैकोसत्त्वेरेकशेषाप्रसक्त्यातदर्थेनप्रभुनाबहुत्वान्वयानुपपत्तिरितिचेन्न
गर्गशाद्यादेकस्मात्छ्हतोपत्यप्रत्ययसत्त्वेस्तद्धितामात्रेकशेषस्यचभाष्यादौयवत्वनत्वात्तथाचय
दितद्धितमात्रस्यैकशेषस्तथापि प्रथमं बहुत्वान्वयानंतरं तद्धितार्थस्य प्रकृत्यन्वयः यदितद्धितांत
स्यैकशेषः प्रथमंप्रकृत्यर्थान्वितस्यतद्धितार्थस्यपश्चाद्बहुत्वान्वयइतिपक्षद्वयसंभवाद्युक्तस्तद
र्थसंशयः तद्धितार्थप्रशेषे प्रथमंबहुत्वान्वयस्यफलं यागेकत्वमिदानीमेवाहतत्रयाचेतितद्धितार्थप्र
शेः प्रकृत्यर्थान्वयानंतरंबहुत्वान्वयस्यफलंयागबहुत्वमाहतदेतिनेनुतद्धितमात्रस्यैकशे
षेपितद्धितांताद्बहुवचनोत्पत्त्यनंतरं प्रकृत्यर्थान्वयप्राथमिकत्वावश्यंभावइत्याशंकायां
प्रथमंतद्धितार्थस्यदेवतान्वयेपिविशेष्यमात्रबहुत्वान्वयोनदेवताविशिष्टस्येतितदापिने
ष्टसिद्धिरित्याशयेनपरिहरन्पूर्वपक्षयतितत्रेतिविशिष्टेनेतिप्रतीतरूपस्यागेमानाभावादि
तिभावः दूषयतितन्नेतित्वत्रकर्मैकोचोदकोप्येकस्मात्तत्रयप्रकृतौहृदयादीनामेकाद

ष्टानामवयवानामेकपशुनिष्पन्नानामंगत्वादिहापि तथैव तन्त्वात् स्यात् एकस्यैव पशोर्यागसाधनत्वं
स्यान्न सर्वेषामिति शंकते कथमिति अत्रावदानशाह्लोवदेयपरः प्रकृतावग्नीषोमीयमित्येकत्वस्य
विवक्षितत्वेन पशोरेकत्वादेकपशुनिष्पन्नैकादशावदानद्रव्यत्वेपीह सप्तदशानां पशूनामपदे
शात्तदनुसारेण चोदकस्य वाच्यत्वात् सप्तदशपशुषु प्रतिपश्वेकादशावदानप्राप्तेः सर्वेषां यागसा
धनत्वमिति परिहरति मानुग्राहीति अनुगृहीतं स्यादभिहित्यर्थः चोदकैकैको दोषस्तत्राहनचेति एक
गणोति एकस्य गणस्यैकपशुनिष्पन्नैकादशावदेयद्रव्यसमूहस्य प्राप्तेरित्यर्थः ऊहापन्नावा
हपशुसंख्येति सवनीयेति एकादशिनानां सवनीयविकारत्वमेकादशिनविकारत्वं च प्राजाप
त्यानामाष्टमिकन्यायेनेति भावः अत्रैकादशिनविकाराः प्राजापत्याः इत्येतावति वक्तव्येप्य
स्यैककर्मत्वपक्षे सुत्याकालत्वसामान्यात्सवनीयविकारत्वे प्राजापत्यानामिति कस्यचिद्भ्रमः स्या
त्तन्निरासार्थमेकादशिनविकारा एव प्राजापत्याः गणसामान्यात् तत्पक्षेप्येकादशिनेषु प्रतिपशु
यागभेदात्सप्तदशसु यागानां गणः प्रकृते तु कस्यैकात्म्यमनाम्नेव गणस्यापि सुत्याकालत्वस्यैका

श्रा०
३८
38

दर्शितेष्वस्थविशेषादेककालालंभनीयगणासंबंधित्वसामान्याधिक्यादेकादशिनविकारा एव
प्राजापत्या न तु सवनीयविकारा इति प्रदर्शनाय सवनीयविकारास्त्वेकादशिन इत्युक्तं उभयथेति ·
कर्मभेदेन तदभेदेन चोपदेशोपपत्तेरित्यर्थः कथं तर्हि कर्मभेदे नि(ः)र्णयस्तत्राह तेनेति श्लोके यदि क
र्मभेदे एककर्मकः स्याच्चोदक इत्यनेन व्यतिरेकमुखेन सूचितं कर्मभेदे उपपत्तिमन्वयमुखेनापि
दर्शयति कर्मभेद इति ननु कपिंजलानां पश्वेकत्वं नानामुत्सर्गो देवदानगणासाध्यभाव स्तत्राह
समांतावयिति अद्रिरक्षेत्रयोरोर्हितेनेना इत्यादौ प्रतिपन्नव्यहानगणाप्रासेनैस्यादिति दोषाद्वीरकृ
तिभावः प्रयोजनयत्रेति सप्रश्नाङ्गनीरित्यादावेक एव मंत्रस्तत्र पूर्वपक्षे अभ्यासभेदेऽपि कर्म
णोभेदाभावात्सकृदेव मंत्रः प्रयोज्यः सिद्धांते तु कर्मभेदात्प्रतिकर्मावर्तनीयः प्राजापत्यादा ६ ह श्रीराम:
रणे तु पूर्वपक्षे सर्वेषां पशूनां यागस्साधनत्वं साधननिवेशी च धर्म इत्युपाकरणादिना सर्वेषु प ३८
शुषुव्यासक्त एव संस्कारस्तस्य घातेन प्रत्येकं तत्तत्श्रोपाकरणादिकं निरूप्य धर्मानुष्ठानानंतरमेकप
शुनाशेन तत्संस्कारस्य व्यासक्तस्येतरगतस्यापि नाशात्तस्थाने पश्वंतरोपादानेन पुनः सर्वपशु

प्रउपाकरणादयश्चावर्तनीयाः । सिद्धान्ते तु प्रथमभेदान्तर्भूतपशुस्थानेऽप्यानीतस्यैव पुनरुपाकरणा
द्यो नान्येषामिति ॥ सत्रे एकाधिकायाः संख्यायाः द्वयस्यैकार्थसमवायात् ॥ सू ॥ ३ ॥ शाक्रमस्ये
तिभाष्यस्थस्येति शेषः । ननु कर्मणि भेदे संख्याविचारानन्तरं कर्मणां गुणसामान्यात् गुणविचारे प्रकृते सू
त्राह यद्यपि तिस्रस्वीकराह न्यायादिति भावः । ननु ज्योतिरादिशब्दानां नामत्वमेवासिद्धं कथं तस्य भे
दकत्वविचारस्तत्राह तेनच्छन्दे तृतीयान्ते न छन्दे त्वर्थः । ज्योतिरादिशब्दे त्रिवृदादिस्तोमपर
ज्योतिःशब्देन तद्गुणातद्वतः क्रतोरनुवादः । तथा सर्वज्योतिर्विश्वज्योतिः शब्दाभ्यामपि त्रिवृदा
दीनि सर्वाणि स्तोमान्यस्य सर्वं यत्क्रतज्योतिष्टोमस्यानुवादः इति भावः । एतच्छब्दस्येति अय
षट्त्रिंशस्येत्यशेषशब्दस्येत्यर्थः । एवमेतच्छब्दस्यत्रापि धात्वंतरं शब्दान्तरं संज्ञातु निष्पन्नं कर्मस्वरू
पाभिधानमिति नैसंज्ञाशब्दान्तरयोर्भेदः । सत्रे संज्ञापि भेदिकापत्वतो निवेशितत्वात् एव पक्षेऽपि य
द्यपि ज्योतिरादिशब्दाः संज्ञास्तथाप्युत्पन्नकर्मणो चरत्वेन सन्निसंयोगाभावान्न तासां भेदक
त्वमिति सिद्धान्तेन तु सन्निसंयोगाद्भेदकत्वमित्याशयेनोक्तमुत्पत्तिसंयोगादिति ॥ १३ ॥ सन्निहितात्कर्मे

शा० णो भेदकत्वसाम्यात्संस्तानंतरं गुणस्य चिंतानत्वसन्निहिताङ्गेदकस्य प्रकरणस्येत्याशयेना
३९ ह स्पष्टानीमिति पौर्णमास्यधिकरणेन यो न रूक्षंपरिहर्तुमाह हेक्षेत्यादिना स्वात्मसंगनये स्वस्यक
मेनैवान्वयप्रश्र आग्नं विधामुस्को ढितीयामाह अनेकत्वादितिविकृत्याद्यनीभूतपयआमिक्षात
39 न्नेलवाजिनं नत्रेति वाजिनं वाक्ये इस्य र्थः प्रथमसंशयहेतुमेव संशयांतरमाह नत्या नडितेतिइदं
चप्रकृतोदाहरणापेक्षं यत्रोभयत्रनेक्षितश्चतुर्थीवा यत्र चन्नतीयादिनो सत्सुसन्त्वशिष्टयोः
करणत्वादिना श्रवणं तत्राधिगुणाङ्गेदस्येन तदधिकरणत्वसाधकत्वात्तत्रोक्तसंशयस्य हेतुत्वा
संभवात नत्वत्र वाजिनवाक्ये आमिक्षायागवाचिपदाभावात्कथं तदनुवादेन गुणविधिप्रवेपक्षस्त
त्राह नत्वेति हि यस्मात् राजमन्त्रमदनीयं तद्रूप यामिक्षयां विश्वेदेवा वाजिनः येशाहोहे मोतस्मा
द्यौगिको वाजिशब्दः प्रकृतानां विश्वान्देवानेव वदेत् एवं च तदस्यास्तीति सर्वनामार्थेनेवक्रितविधा योगार्थ
नादनुवादस्य च संभवे संमवे सन्निहितगामित्वात्प्रकृतानामिक्षायागसंबंधिनो विश्वान्देवानन् श्री रामः
द्यतस्मिन्यागे वाजिनगुणविधिः संभवतीत्यर्थः वाजिशब्दस्याश्वेरूढत्वाद्विश्वदेवपरत्वे रूढिप्रवर्क ३९

लक्षणा स्यात्तत्र तु यौगिकत्वमिति शंकानिरासाय सूत्र उक्तं मुख्यार्थसंबंधाभावान्न लक्षणा किं त्व
वयवशक्त्या यौगिकत्वमेवेति भावः ननु वाजिशब्दस्य विश्वेदेवपरत्वेपि तेषां न तत्त्वेन देवतात्वं किं तु वाजि
त्वेन तथा चेदं सर्वमिदं इत्यायेन देवताभेदात्पूर्वकर्मसमवाय इत्यत आह नेहामिक्षाप्रदानरूपेणेति देवता
रूपेणेत्यर्थः तेनैवेति शेषकर्मदेवतात्वप्रयोजकविश्वेदेवत्वरूपेणैवेत्यर्थः नन्वेवं वाजिशब्दस्याश्वे त्वकम
रूढित्यागो दोषस्तत्राह एवं चेति बहुभ्यो दोषेभ्यो वरं रूढित्याग इति भावः आकांक्षाविरहादन्वयाहेतापि
नास्तीत्याह योग्यतावेति निष्कृष्येति आमिक्षावाक्ये इत्यादेवतासंबंधादामिक्षया यजेतेति यजिपदक
ल्पनात्कल्पितयजिपदमेव केवलं कर्ममात्रमस्मिन्वाक्ये आमिक्षासंबंधादिश्लेष्यानुवदतीति स्वी
क्रियत इत्यर्थः कल्पितयजिपदेन स्वरूपमात्रानुवादसंभवेपि वस्तुतस्तस्य कर्मणो गुणान्तरा
वरुद्धत्वान्न वाजिनान्वय इत्यत आहाभिधानेति नवस्थितिरिति अन्यथा पुरोडाशकपालादेः स्वरूपमात्रे
णाभिधाने तत्स्वरूपोपकारापत्त्वयोने स्यादिति भावः ननु शाब्दांतराधिकरणे यागानुरक्तभावनायांत
दोनानुराग इत्युक्तं तद्वदिहापि किं न स्यादत्राह शाब्दांतरेति श्रौतत्वादिति सास्य देवतेति विहिततद्धित

शेषादित्यर्थः उभयोरिति· आमिक्षासंबंधवाजिनसंबंधयोरित्यर्थः· विकल्पइति· वाजयोगस्य वि ×२

ग्रा० स्यदेवताविधिप्रत्ययस्याभिधायित्वादिति भावः एतेन चतुर्थीतद्धितस्य प्राबल्यं दर्शितं वाजिनसंबं
४० धादिति वाजिनस्य देवतासंबंधादित्यर्थः न त्वामिक्षायाइति आमिक्षालेनेति शेषः तद्धितस्य द्रव्य
40 सामान्यवाचित्वादिति भावः तस्मादिति नोद्धृत चतुर्थ्योरविशेषणत्वे समुच्चयः उपलक्षणत्वे वि
कल्पइत्यर्थः अत्र विकल्पपक्ष एव प्रबलः आमिक्षासंबंधान्निष्पन्नवाजिनविध्यंगीकारादिति
बोध्यं उत्पन्नागिति उत्पन्नो चोदितत्वाच्छ्रुतिचोदितत्वाच्चेत्यर्थः तथापीति अनुवादस्य पुरोवादसा
पेक्षत्वात्पुरोवादे चोत्पत्तिशिष्टगुणेन गुणांतराकांक्षा प्रतिबंधादस्तु सात्तिशिष्टस्य प्राबल्यं पुरो
डाशैककपालादौ लगत्वाकर्षणं च निष्कृष्याभिधानेनाकांक्षोत्थाप्यते नैवमत्रागतिर्विशिष्टकर्मोत्पवि
धिसंभवादिति भावः तद्धितचतुर्थ्योः कल्पबलं लं निरस्यति श्रौतस्त्वेति न तु तद्धितस्य द्रव्यसामान्य
वाचित्वे त्वामिक्षालक्षणविशेषवाचित्वाभावान्न तत्संबंधः श्रौतत्वत्राह तद्धितस्येति सामान्यस्य
सर्वनामार्थतद्धितार्थस्यापि हांतरार्थविशेष एव पर्यवसानादस्ति सर्वनामार्थविहितन तद्धितस्य तद्वाचित्व श्री एमः
मतः श्रौत एवायमिति भावः चतुर्थ्यास्तु न द्रव्यसामान्यमप्यर्थोस्ति महदंतरमित्याह वाजिभ्य इति· ४०

एतेनाद्याश्रुतस्य यागस्य द्रव्यदेवतासंबंधेन कल्पनात्काचामिक्षावाजिनोभययागे सिद्ध एक एवला
घवात्कल्प्यतेन वाजिनाविधौ यतश्श्रुत्वभयोरप्युत्पत्तिशिष्टत्वेतिशंकानिरस्ता। आमिक्षादेवतासं
बंधस्य श्रौतत्वेन झटित्यामिक्षावाजयागे एवाद्ये यागकल्पनेनोभयोरुत्पत्तिशिष्टत्वाभावात्। अन्यश्चेति
तद्धितस्य देवतावाचकत्वं चतुर्थ्याः स्कलक्षकत्वमित्यादयः सर्वे गुणपूर्वकर्मनिवेशाभावे भेद
कः तन्निवेशाभावश्चोभयोरपि वाक्ययोः समत्वान्निवेशोऽनपेक्षत्वादनुवादकत्वादेकस्य वाक्यस्यान
रापेक्षायामेव पूर्वकर्मनिवेशः स्यान्नान्यथेति भावः॥ ॥अग्नि॥ ॥अग्निहोत्रं जुहोतीतिगुणर
हिते कर्मण्युत्पन्ने दध्नादिगुणविधिः संभवति नतु सगुणस्योत्पत्तावामिक्षावाक्यवदित्युदाहरण
र्थमित्यर्थः अन्यतरेणैकैकस्माद्वाक्यादेकैकगुणोपस्थितस्यापि सर्वेषां गुणानामन्वयायोगाद्यस्य
प्रथममन्वयस्तद्वरुद्धे पूर्वन्यायेनान्यान्वयासंभवात्कर्मान्तरत्वमत एव संगतिरिति भावः प्रयो
जनं पूर्वपक्षे दध्यादिविशिष्टानां कर्मणां सर्वेषामनुष्ठानं सिद्धान्ते त्वेकस्यैव विकल्पितदध्यादि
द्रव्यकस्य॥ ॥फल॥ ॥तत्रैवेतिनत्वाग्निस्येत्यर्थः नन्वस्मिन्पक्षे कर्मान्तरत्वाभावाद्दधिहोम

शा० संबंधोपि विधेय इति वाक्यभेदः स्यात्तत्राह दधीति प्रकरणाद्धि होमसंबंधानुवादे कर्मान्तरत्वाभा
५१ वेपि न वाक्यभेद इत्यर्थः द्वितीयचिन्तायास्तादर्थ्यमुपसंहरति तेनेति ननु सिद्धान्ते गुणफलयोरन्वयस्य
51 साक्षादनुपपत्त्या भावनाद्वारेणैव वक्तव्यत्वात्याश्च भावनायां गुणफलोभयसंबंधविध्यनुपपत्तेरन्यतन
एनर्थक्यापरिहारात् भावनान्तरविधेरवश्यवाच्यत्वेन भाव्यकरणभेदेन च भावनाभेदस्यावश्यकत्वा
तत्रा न्नास्याश्चिन्तायाश्चाध्यायसंगतिरित्याह मत्वपीति भावनाभेदहेतुत्वेन धात्वर्थभेदोपि विचार्य इति
तत्प्रसंगादध्यायसंगतिरित्यर्थः पूर्वपक्षोपयोगितया भावार्थाधिकरणन्यायं स्मारयति धात्व
र्थादिति मत्वर्थलक्षणेति एकपदस्थत्वादिति भावः ननु पूर्वाधिकरणे निर्गुणसन्निधौ सगुणश्रु
तेर्गुणार्थत्वोक्तेः कथं कर्मान्तरत्वमित्याशंक्य पूर्ववैषम्यमपवादोन एवं संगतिरित्यभिप्रेत्याह कि
मत्र दध्नः फलसंबंधमात्रं विधीयते उत सिद्धस्य व्यापारान्तरावेशेन फलसाधनत्वायोगात्तदर्थं तत्
स्य होमसंबंधोपि विधीयत इति विकल्प्य क्रमेण दूषयति किं चेति ननु दध्ना जुहोतीति वाक्यप्राप्त श्रीरामः
दधिसंबंधानुवादेन होमस्यैव फले विधिरस्तु न चानेनानर्थक्यं वाक्यभेदापत्तिरित्याशंक्य क्रमेणानुवादस्य ५१

सर्वस्योत्पन्नवाक्यमात्रापेक्षत्वेन गुणवाक्यानपेक्षणाद्दधिशब्दस्यानंतरमेव फलविधिरित्यत्र च मानाभा
भावादुक्तप्रकारासंभवेनात्रैव वाक्ये दधिफलार्थतया होमाश्रितत्वेन च विधेयमिति स्याद्देव वाक्य
भेदः एतन्निपाहोमसंबंधस्याविधौ जुहोत्यानर्थक्यमेवेत्यभिप्रेत्य श्लोकं व्याचष्टे नहीति नन्वप्रकरण
प्रामाण्यवादान्नवैयर्थ्यमित्यत्राह तस्य चेति प्रकरणेन होम एव प्राप्तो न तु दधिहोमयोः संबंधोपीति तन्ह्यनु
वादायोग्यात्म सर्वथा त्यक्त एव स्यादिति भावः विधेयमिति न स्वेवाविधिसंबंधान्निर्वाहाय फलाकांक्ष
त्वादिति भावः श्रुत्यर्थविधेर्ज्यायस्त्वमालंब्य शंकते नन्विति निपविहरतिन प्रकृतानियागांतरत्वे कु
र्वत्यस्यास्य जुहोत्यानर्थक्यमापत्तेरगत्या प्रकृतहोमानादित्सोकार्यमिति शंकते जुहोतेरिति केचिदि
ति प्राभाकराः स्वार्थः कर्मोपपन्ने होमानुरक्ते भावार्थे स्य क्रियारूपस्य विधिविषयत्वं हि वि
धिप्राप्तिकार्यावच्छेदकत्वं न च तत्रतेति साध्यरूपकार्यविशेषणीभूतक्रियस्यावच्छेदहानादवच्छेदक
ता च क्रियाया एव साक्षात्कृतिव्याप्यत्वान्न तत्क्रियारूपस्य दध्न इति भावः ननु तस्यैव प्रपकत्वा
होम एव विधीतां न चैवं दधिप्रदानयोः संध्यानुरक्तस्यैव होमस्य विध्यंगीकारादित्याशंक्योपप

प १

प्रा० ४२ त्रिरित्याह अत इति नन्वेवं दधिहोमसंबंधस्य होमफलसंबंधस्य च विधौ वाक्यभेद स्तत्राह न चैवमि
42 ति नानु दध्नो होमसंबंधस्याप्राप्तत्वात्सोपि विधेय स्तत्राह लौकिकमिति दध्नः कारकत्वाद्धोमस्य
च क्रियात्वात्तयोः क्रियाकारकसंबंधं लौकिकमिदमनन्यथा दध्यनुरक्तो होमस्तस्मादिंद्रियकाम
स्य सेनावगम्यात्ते विधीयत इत्यर्थः क्रियापत्तेः क्रियानुरागः ननु सोमेन यजेतेत्यादौ कारकत्वं ता
दर्थ्यलक्षणशेषशेषिभावसंबंधेन दृष्टांतादर्थ्यं च विधेर्गम्यमिति वाक्यभेदो दुर्वार स्तत्राह न
पुनरिति। क्रियानिर्वर्तकत्वमेव कारकत्वं न तु तादर्थ्यपर्यंतं तथात्वे कर्मकारकस्य क्रियार्थत्वाभावे
न कारकत्वाभावप्रसंगात् क्रियानिर्वर्तकत्वमात्रं च लौकिकगम्यमेवेति भावः नन्वेवं दध्यनर्थकं
स्यात्फलार्थहोमविधानान्नतश्च दध्नो होमार्थत्वं तत्राहात इति केवलहोमस्याविधानाद्दध्यनुर
क्तस्य विधानान्नानर्थक्यमिति भावः फले विधानादिति फले दध्यनुरक्तहोमविधेरर्थाद्धोमा मी॰एम॰
श्रितदधिव्यापारस्य सिध्यातस्य फले विहितत्वात् किं॰ दध्नेव फले विधेयं न तु दध्यनुरक्तो होमस्तत ४२
श्च जुहोतेरन्वयो दुर्घट इति दूषयति अत्रेति न फलार्थमिति ततश्च न सिद्धांतसिद्धिरिति भावः न

तु होमानुरागसिध्यर्थमुपादीयमानमपि दधि न होमार्थं तथाविध्यभावात् किंतु फलार्थमेव नापि स्व
तो दधिफलार्थं विधीयते ध्यानुरक्तहोमस्य फले विधानेनैव तदनुरागायोपादीयमानमपि दधिफ
लार्थं सिध्यतीत्यस्वरसादाहापि वेति तस्यानुरागस्य लौकिकत्वं मंमये दूषयिष्यत इति भावः वाक्य
भेदपरिहाराय पक्षांतरं शंकते नन्विति दूषयति उच्यत इति वाक्यादिति जुहोतिपदसमभिव्याहारस्व
पादित्यर्थः न वाक्यभेद इति होमाश्रितं दधिवाद् ध्यानुरक्तहोमो वा फलाय विधीयत इति पक्षद्वयेपी
ते ति शेषः वाक्यभेद इति अन्यथा सोमेन यजेतेत्यादावपि सोमयागयोः क्रियाकारकभावं लोकसिद्ध
मादाय केवलयागविधेः सुवचत्वादिति शिष्टविधिमात्रोच्छेदापत्तिरिति भावः वाक्यभेदमेव संभावित
वचनव्यक्तिनिरासेन विशदयति तथाहीति अविधेयत्वादिति अहोत्रवाक्यादेव प्राप्तत्वादिति भावः के पि४
र्मत इति विहितविधानायोगादिति भावः इति चेति विधेयत्वादिति शेषः इंद्रियकामस्येत्यत्रेंद्रियकाम
इतींद्रियरूपकाम्यफलमपर्थउननत्कामी पुरुषः आद्यमनुवदति यद्यपीति काम्यत्वरूपनिवेशात्तु
पयोगान्निष्कृष्टमर्थमाह इंद्रियार्थेनेत्यादि इदमंगीकृत्याक्षिप्तीये होमप्राप्तिमाह तथापि दृष्टार्थ्यमिति-

तद्गुणार्थेनेति हैववचा संपन्नेन्द्रियकामनोपलक्षित पुरुषप्राप्तहोमानुवादेनेत्यर्थः कामपदस्य फलपर
तया एकादशे वक्ष्यमाणत्वान्न देवाभ्युपेयं स्वारसिकत्व स्वारसिकपुरुषपरत्वमित्याह तद्युक्तमिति
लक्षणेति अस्वारसिकार्थपरत्वप्रसंगादित्यर्थः वाक्यभेदादुपलक्षकत्वं वरमित्यस्य चैतरहापि चेति क
त्वगमिति श्रुतादिति भिन्नकाचमकादिवदिति भावः विवरणोक्तिं दध्नेन्द्रियकामस्य जुहुयादिति गुण
विभक्ताकारो होमः श्रुतः प्रतीयमानत्वश्रुश्च इव बलवादिनो निबंधनकारस्य मते श्रुतबलाद्गुणवि
भक्तत्वाकारेण होमस्य नियोगविषयत्वं प्रकृतनियोगे तु न गुणविभक्तत्वाकारेण होमो विषयो
ग्निहोत्रवाक्ये गुणाश्रवणात् किंतु स्वरूपेण एवं च रूपभेदेन प्रकृतविषयप्रत्यभिज्ञानाभावात्स्व
वे नियोगान्नियोगांतरमिंद्रियकामवाक्ये प्रतीयत इति स्थितिः विवरणवादिनस्त्वव स्तबलगा
दित्वाच्छ्रुतो गुणविभक्तहोमप्रतीतावपि न गुणविभक्तत्वाकारेण नियोगविषयत्वं किंतु वस्तु श्रीरामः
बलाज्ञातार्थरूपहोममात्रस्यैव एवं च रूपभेदाभावेन प्रकृतविषयप्रत्यभिज्ञानबाधाभावादिंद्रिय ४३
कामवाक्येन न नियोगांतरसंबंधः स्वीकुर्वाणस्य निबंधनकारस्य मतेन ह्याकारसंपादकस्य गुणस्य
नियोगांतरं किंतु स एव नियोग इति मतं । एवं बलोकतः सिद्धगुणविभक्ताकारमादायेन रूपेण होमस्य ×१

कथंचिच्छब्दव्यापारं विनार्थान्नियोगसंबंध [stain] लाभ इत्याशङ्क्याभ्यामपि विवरणमतेन त्वसा।
शापि नास्ति स्वरूपेणैव होमस्य तन्मते विषयता नत्र शाब्दव्यापाराभावे लोकतो दधिहोमयोः संबं
धसिद्धावपि दध्नः प्रकृतनियोगसंबंधस्यालौकिकस्य कथंचिदप्राप्तेस्तस्मात्प्रकृतनियोग
संबंधस्य फलसंबंधस्य च वाक्येनैवात्र मते वस्तुबोध्यत्वात्स्वतन्त्रं वा क्रमभेदः स्यादिति भावः। तस्मा
दिति होमसंबंधस्य दध्नो दधिसंबद्धहोमस्य वा विध्यसंभवादित्यर्थः। होमसंबद्धदधीत्युपलक्षणं दधि
संबद्धहोमो वेत्यपि द्रष्टव्यं। अपि तिलितेयमिन्द्रियकामः सदध्ना। तीन्द्रियकामो दृशोनदध्नेत्येतावन्मात्रे वि
धीयत इति योजना। अन्याचार्यमते तु होमस्यान्वयमुपपादयितुं पूर्वोक्तं तन्मात्रेण समारयति कथमिति क्रिया
पेक्षमिति क्रियां कुर्वद्धि कारकमिति न्यायादिति भावः। इदमुपलक्षणं कारकस्य प्रत्ययेनैव वि
धेयत्वात्तस्य च केवलस्य प्रयोगानर्हतया क्रियापदापेक्षत्वाच्चेत्यपि बोध्यम्। अग्र इति तृतीयाभि
हितकारकत्वोपपादकतयापेक्षितत्क्रियासंबंधस्य सन्निधिना होमनिरूपितत्वावगमात्क्रियाका
रकभावेन दध्यन्वितत्वावगतो होमो नूद्यत इत्यर्थः। अत्र नास्त्युभयाकांक्षालक्षणं प्रकरणं तत्

श्रा. स्यविनियोगमात्रप्रमाणत्वात् इह श्रुत्याश्रयापेक्षायामपि होमस्यानित्यद्रव्ये निराकांक्षत्वाच्चेत्याशयेन
४४ सन्निधीत्युक्तं ननु सिद्धं तेधात्वर्थे क्रियात्वेन कारकाणामन्वयात्तव्यनीयाख्यगतं करणत्वं न होमापेक्षं
किंतु लिङादेरिव फलभावनापेक्षं तेन स्वस्वरूपेणैवेति नजुहोत्यपेक्षेति शंकनेनन्विति वैषम्येण
परिहरति उच्यत इति अत्र तव्यप्रत्ययो हि तुमाहकत्रिविधात्वर्थस्य साध्यस्वरूपत्वात्स्वरूपेण कर्तृव्या
पारविषयतया फलभावनाकरणत्वं संभवति विनैव धात्वर्थान्तरापेक्षां इह स्तु सिद्धस्वरूपत्वात्स्व
रूपेण कर्तृव्यापारविषयतया फलभावनाकरणत्वं संभवति विनैव धात्वर्थान्तरापेक्षां यत्किं
चिद्धात्वर्थरूपकर्तृव्यापारविषयतयैव नियोगेन करणत्वं सन्निहितहोमनिरूपितमेवास्त
न च धात्वर्थस्य कारकानन्वयः साक्षादनन्वयेपि मन्त्रादिकल्प्यविधिवशात् ऋचा होमं भावयेदिति
दधिकरणकहोमकर्मकभावनाबोधात् भावनाद्वारा तदन्वयोपपत्तेः न च कल्प्यविधिनादध्नो हो
न२ मार्थता स्यात् फलार्थीति मन्त्रादेः श्रुतफलार्थतायाउपपादकतया कल्पितस्याविधेः सन्निधानेना श्री एम:
न्यार्थत्वात् किंतु होमस्य दधिनिर्वर्त्यत्वेन दधिगतकारकत्वमात्रोपपादकत्वात् नचैवमपि श्रुतवा ४४

नेर

कार्यं जुहोतेः कारकानन्वय एवेति शंक्यं विधाने धात्वनुवादे च धात्वर्थः करणं भवेदिति न्यायाद्भावा
र्थस्य चाविधेयत्वात्तत्र दधिपदलक्षणया तद्विषयता होमे नेदि यं भावयेदित्यन्वयबोधाकारस्याव
श्यकत्वात्तत्र चेन्द्रियकर्मक भावनानिरूपिता या दधिविशिष्ट होमगतकरणता याः फलनिराका
ङ्क्षे होमे बाधात् द्विषोषणीभूतदधिगतत्वेन पर्यवसानाद् दध्नेन्द्रियार्थत्वमप्राप्तत्वाद्विधेयमिष्यते
ति दधिमतेति तु मतुपा जुहोतिना च सन्निधिकल्प्यविधिना तद्दधिहोमसंबन्धोऽनूद्यते न चैवं ल
क्षणादोषः पूर्वपक्षाद्विशिष्टः तत्र विधेयार्थीकपदे सामर्थ्यत्वमनुवाद इति विशेष इति भावः नन्
दध्नः करणत्वं यथा जातादृष्टार्थकर्तृव्यापारविषयत्वेनैव स्यात् तच्च न दृष्टकार्यत्वरूपं यागादेरि
व स्वरूपेणैव तत्र साध्यस्वभावत्वस्याप्रयोजकत्वात्तथा च फलभावनापेक्षमेव करणत्वं तेनीया
र्थेन होमापेक्षमिति शंकते पयपीति तन्नुद्गुणकामस्थले संभावितादृष्टार्थव्यापारोपलक्षणा
र्थः यथाजतशब्दः करणत्वस्यात्र दृष्टादृष्टार्थाभयविषव्यापारविषयत्वनिर्वाहत्वात्तत्र दृष्टार्थव्या
पारे [illegible] र्थः यथाजयशब्दः करणत्वस्यानवरुद्धविषयत्वार्थे होमरूपदृष्टार्थक्रियापेक्षा होम

स्य च दधिगतकारकत्वनिर्वाहकत्वमात्रं न त्वदृष्टद्वारा फलार्थत्वमिति दृष्टार्थतेत्यभिप्रेत्य परिहर
ति न तथापीति ननु कर्तृव्यापारविषयत्वाभावे एव कारकत्वोपपत्तेर्मोक्षदृष्टार्थव्यापारविषयत्वं
न त्वाह श्रवणं चेति अन्यथा फलोद्देशकृतिव्याप्यत्वाभावे करणोपदेशो निदध्यादिसिद्धरूपत्वा
त्तेः चेष्टाधर्म्यमिति ग्रहत्यानुपदेशात् फलस्य चायत्नसिद्धत्वादिति भावः तस्मादिति दृष्टार्थव्या
पारविषयत्वस्यावश्यकत्वादित्यर्थः विभक्तावपि हितेति द्वितीया न निरूपितत्वस्याप्युपलक्षणं दधि
विशिष्टं वा कारकमित्यत्र हेतुः प्रत्ययार्थेति ननु तृतीयार्थकारकस्य फलाय विधानेन विधेयस्य क
रणत्वेनैव भावनान्वयनियमात् तस्य च करणत्वं तरस्य बोधकाभावात् कथं न द्वाधस्तत्राह फ
लभावनेति न विभक्तौ तिष्ठ अन्यलभ्यत्वादिति भावः ननु दध्नानुहोतीत्यादाविव आनयनादि दृ
ष्टार्थव्यापारविषयत्वेनैव करणत्वं स्यात् किंतु होतिनेत्याशंकाऽनन्वयैव सन्निधिनारूढत्वमुप
स्थितेरित्यभिप्रेत्याह कारकभाव इति एवं च वाक्येन परिशेषाद्दध्नः फलान्वयमात्रस्य विधेयत्वा
द्विधेयान्तराभावान्नवाक्यभेदप्रसक्तिरित्युपसंहरति कारकभावश्चेति एकपदेति दध्नेतिपदश्रु

नीत्यर्थः प्रयोजनेष्टौ पक्षे फलार्थे होमे सायंप्रातःकालनियमाभावः सिद्धान्ते सायंप्रातस्थेव ग
नित्यहोमे दधिप्रयोगः सत्रे कर्मकर्मान्तरं स्यात् फलस्याभावात् अधिकरणान्यायेन कर्मसंबंधित्वा
त्॥ समे ॥ त्रिवृत्स्तोत्रीयानवकस्तोमकः अग्निष्टुत् अग्निष्टुन्नामकः अग्निष्टोमः अग्नि
ष्टोमसंस्थः अग्निष्टोमेति अग्निष्टोमस्तोत्रसाधनसामलक्षणयज्ञाय तावद्व्याग्नेयीषु प्रकृति
वत् प्राप्तेन तत्र वायव्यास्विति वायुदेवताप्रकाशकर्क्षु वचनेन प्राकृतकर्मापवादः त्रिवृद्वहित्य
नेनाविधीयमानत्वे स्तोत्रेषु त्रिवृत्त्वप्राप्तावग्निष्टोमस्तोत्रसाधनसाम्न्येकविंशत्वं प्राप्तिप्रसक्त
यत एकविंशमित्यनेनेति ध्येयं तस्य चेति इदं च वक्ष्यमाणानुवादत्वसौकर्यार्थमुक्तं रेवत्यो
षितिरेशावृत्तौ पित्यर्थः पूर्वापवादात्ते गतिरिति सूचयन् पाठक्रमस्यान्यतः प्राप्तगुणमात्र
विधिरिति पूर्वाधिकरणसिद्धान्तन्यायेन पूर्वपक्षमाह तत्रेति ननु गुणसाध्यस्यैवाश्रयत्वाद्या
गस्य च साक्षात्त्वामसाध्यत्वाभावान्नाश्रयत्वसंभवस्तत्राह सामाश्रयत्वमिति आनर्थक्याद्धि
ति समन्दध्यारत्नि वाजपेयस्य यूप इत्यत्र समन्दध्यारत्निलस्य वाजपेयसाक्षादनन्वयात्तदंगयूप

शा॰ दी॰ ४६ यागं वा पूर्वद्वारान्वय इति तृतीये वक्ष्यमाणन्यायेनेत्यर्थः त्वकाशब्देनेति क्रान्तसंदर्भेणोपस्था
पितस्य रेवत्याधारवारवंतीयसाम्नः फलसंबंधमात्रविधौ नान्तर्वाक्यभेद इत्यर्थः अन्यथा
सिद्धान्तेपि वाक्यभेदः स्यादित्याशयेन दृष्टान्तमाह यथेति शिशिरेति सोमाद्विविधिच्छेत्यर्थः ननु या
46 गस्य सोमवैशिष्ट्यं न तृतीयार्थः किंतु सोमवतेति मतुबर्थो वैशिष्ट्यमित्यत उक्तमाहिमिरितितेन म
त्वर्थाद्यग्रहः वारवंतीयकरणेनेति करणं कृतिः सा च रेवतीवारवंतीययोः समभिव्याहृतीयाभ्युं
कारकत्वेनोपस्थितयोः परस्परान्वयस्य क्रियाद्वारकत्वान्न त्रुटकतयोर्यागज्ञानं तु विधेयत्वे
नतेन रेवत्याधारवारवंतीयेन गुणस्य विधीयमानत्वादिति यथा विरोधः विपरिवृत्तिः पक्ष्मतोपस्थितिः
फलवत्वेन तिस्रस्तु फलाय विधीयमानेनेत्यर्थः अनुवदतीति अतो न पशुस्यार्थविधानादपि वाक्य
भेदशंकेति भावः षष्ठं तृतीयत्यानेन तृतीयान्ते तद्वत्स्य विधेयगुणप्रतिपादकतया विधिशेषाना
नुवादकः न चाविधेयगुणो वारवंतीयपदेनैवोपात्त इति संक्रान्तस्य द्वितीयान्तत्वेन प्रधानतयो श्रीरामः
पस्थितस्य फलभावनाकरणत्वान्वययोग्यत्वात्तृतीयान्तपदावश्यकत्वादिति सूचितं एवम ४६

श्री

ष्टोमाख्यस्तोत्रसाधनत्वविधानादपि न वाक्यभेद शंकेत्याह अग्निष्टोमसाम भवतीति नन्वग्नि
ष्टुत्कारनेन स्तोत्रं तत्र गुणत्वेपि चोदकात्प्राप्तस्य विशेषाद्विशिष्याग्निष्टोमस्तोत्रसंबंधानुवा
दायोगात्सोपि विधेयस्तत्राहपघतीति हषे इति क्रत्वर्थवाक्यशाखोपस्थितस्य विपरिवृत्तस्योदको
त४ पस्थितस्तोत्रान्तराद्विशिष्टविशेषइतिभावः एवमनुवादोपयोगायैव आकरणिकं वारवंतीयमग्नि
ष्टोमसाम कार्यमिति वाक्यस्याप्यदर्शितं गृह्णाति कारकीभूतसवस्तु सर्वः प्रकृते तु अनर्थ
साहयागइति न प्रकृतेन विशिष्यस्वशब्देन सन्निहितं संगंभूतस्तोत्रद्वारा यागस्त्रयत्वमुक्ते
निरस्यति न चायमिति न हीति क्रियाकारकभावस्य साक्षात्संबंधरूपत्वाहितिभावः आराद्रुप
क४ कारकस्य च स्तोत्रस्य यागे कारकत्वाभावेनेनद्वारेणाप्युपकारकत्वमिति समिदादिवत् सामस्ति
तिते यथा चाप्युपसंबंधानानुवादाद्यजतिरूपयागांतरविधिरेवेति भावः उक्थ्यादिसंस्थानानुस
स्थादिक्रियात्वेपि संसंबंधिकत्वात्क्रियांतरापेक्षेति वैषम्यं बोध्यं संबंधांतरेणेति पशुकाम उक्थ्य
गृह्णीयादिपाक्षायणयज्ञेनस्वर्गकामेत्यादौ संस्था आवृत्यादिरूपगुणस्य प्रकृतयागकारकत्वेपि

फर्ज

मा-टी० ८७ तत्संबंधिप्रयोगपरिच्छेदकत्वेनैवाश्रितत्वादितिभावः एवंच सामान्यः कर्तृव्यापारविषयत्वार्थक्रियेया
तत्रानपेक्षत्वेपि त्वकाशाद्योक्तसमानकत्वाभावेन रूपेक्षा ली स्पृशयेनाह किं तदितिपरिहरति एव
मपीति यागस्याप्रयत्नसंभवेपीत्यर्थः नावकल्पत इति द्वैधप्यर्थ्यमादितिभावः तत्र हेतुः अनुवादत्वे
ति चोदकप्राप्तान्याद्यिभ्रुवत्रूषमस्तु विशिष्याग्निष्टोमसंबंधानुवादत्वाभावादितिभावः प्रमाण
मिति तेन लघुदात्रहस्याकरणिकवाक्योग्निष्टोमस्य यागस्योपस्थितिः फलार्थवारवंतीयस्याग्नि
ष्टोमस्तोत्रस्यानभिसंबंधमानेनतस्याः कर्तृगुणविधानार्थत्वादितिभावः किंचेतिइदमापादनतः
आख्यातप्रत्ययस्य धातुसंबंधे प्रत्यययाइतिभावः त्यधिकृत्य विधानाद्धात्वर्थेन रसंबंधस्यावश्यकत्वा
द्भावनायाश्चाधात्वर्थत्वादितिध्येयं कल्पितेनेतिनिर्वाहितेत्यर्थः त्वकाशह्योक्ते भावनाधारकत्वा
द्रेवतीवारवंतीयरूपकारकसंबंधस्येतिभावः रेवतीर्तिवारवंतीयसाक्षाद्यागविशेषणेनद्वारा श्रीरामः
रेवत्यस्त्रिविवेकः नन्वग्निष्टोमस्तोत्रविशेषित. इत्यपिवक्तव्येकथंरेवतीवारवंतीयसंबंधवि ८७
शेषितत्वमात्रोक्तिस्तत्राह तत्रेति सामान्यः वारवंतीयस्य प्रकृतित इति अग्निष्टुद्यागादिसर्थः त

स्य प्रकृतित्वं च द्वेधा समर्थयंते एतस्येति षष्ठ्यंतस्य प्रस्तूयमानकर्मानुवादमात्रपरत्वे श्रानर्थ-
क्यापत्त्या एतस्येतद्धर्मकस्येति प्रकृताग्निष्टुद्धर्मातिदेशकत्वस्य वाच्यत्वात् यद्वाग्निष्टुदादौ नो-
निकाग्निष्टोमिकायिष्टुप्रथमस्य विध्यंत उत्तरे षित्वष्टमे वक्ष्यमाणत्वात् रेवतीनामविहित-
कर्मांतरापेक्षायामाग्नेयस्यापि इति तत्प्राचाग्निष्टुति वारवंतीयसाम्नोग्निष्टोमस्तोत्रस्थानत्वान्नाध्य-
कृतादिहापितस्य तत्स्थानत्वप्राप्तेरग्निष्टोमसामेत्यनुवाद इत्यर्थः नन्वग्निष्टुति वायव्याधारस्ये-
व वारवंतीयस्याग्निष्टोमस्थानत्वादिह कथं रेवत्याधारस्य तस्य तत्स्थानत्वमत आह तदनु बहु-
इतिकारश्चैवायस्याग्निष्टोमस्थानत्वप्राप्तौ तदाधाररूपरेवत्योप्यग्निष्टोमस्तोत्रसंबद्धा भवंतीति तेन
रेवत्याधारस्यापि वारवंतीयस्याग्निष्टोमस्थानत्वोपपत्तिर्वायव्यानां तु रेवतीभिर्बाध इत्यर्थः एत-
ब्धह इति षष्ठ्यंतस्य धर्मातिदेशकत्वपक्षे न्नतीयांत इति शेषः पक्षद्वयोरूर्ध्वगुणाहोषज्जाते संगृह्य दर्श-
यति वक्ष्यमाणपरद्बगुणाश्रुतेर्धारेवती इति यत्तु प्राभाकराः तेषां वाक्येनैवेत्यादिः ननु यत्र
गुणाश्रयसंबंधो लौकिकस्तत्रैव गुणफलसंबंधो वाक्यीय इति तेषाम् अभ्युपगमः प्रकृते तु क्रतुना
× वाक्येनैव गुणाश्रयसंबंधगुणफलसंबंधयोरभ्युपगम्यतां विशिष्टस्येति विशिष्टतया वाक्ये नैवोपस्थितस्येत्य-

र्थः विधीति × २

पू.दी० मयोः स्तोत्रे कारकत्वेनान्वयसंबंधस्य लौकिकत्वेपि न स्तोत्रयागयोः संबंधो लौकिक इति वैषम्यं
४८ प्रकृते नन्विति स्तोत्रयागयोरंगांगिभावस्यालौकिकतः सिध्यभावेप्यतिदेशतः सिद्धिरस्तीत्याह स
त्यमिति स्तोत्रानुरागमिति तत्र रेवत्याधारं वारवंतीयमेव तु एतेनाभिमतेन स्याच्च यागस्य फ
स्तो ८ श्रय संबंधघटकमात्रं स्तोत्रमिमंत्रानुरक्तत्वाकारेण यागस्य फले विधिस्तदा स्तोत्रस्य कत्वेर्थ न ४
त्वानापत्तेः किंतु वारवंतीयानुरक्तत्वेनैवेति भावः अरक्तवा स्तोत्रानुरक्तत्वाकारेणैव यागस्य
फले विधिस्तदापि न वाक्यभेद इत्याह किंचेति तत्कारकत्वमिति दृष्टांतार्थं लोकसिद्धमेवेति इ
त्यक्रिययोः क्रियाकारकभावव्युत्क्रिययोः समानकर्तृकत्वमपि लोकसिद्धमेवेति भावः ननु स
मानकर्तृकत्वसंबंधेन विधिपक्षे तवापि सिद्धांतहानिः स्यात्तस्माद्भाष्याभिमत एवायं पक्षो हृद्य इत्यरु
चेराह यद्वेति फलार्थगुणस्य कत्वंतः प्रवेशासिध्यर्थमतिदेशमात्रमिति ननु यजिपदस्य विधेयो श्रीराम:
गविधायकत्वया न सैव गुणानुरक्तस्य फले विधिरीत्यो न तु स्तोत्रस्येत्यत आह यजिपरस्येति निर्वी ४८
पेति सोयं चरुं निर्वपेदित्यादाविति शेषः इत्यादेवतासंबंधेति निबंधनमतेनोक्तं ननु तत्र निर्वापस्या

निर्देशातः प्राप्ते विधेयमानेवमत्रे सत आहयजेरपीति त्वया स्तोत्रानुरागस्यालौकिकत्वोक्ता
न्तदनुरक्तयागस्य फले द्विधा नायोगात्कर्मानेर विधेर्गौरवादग्निष्टुद्वाक्याद्यागस्य प्राप्तत्वाच्चेति भा
वः। सत्रेसमेषु क्रियात्वाविशेषाद्वाश्रयानपेक्षत्वयानत्वेषु रागैस्सु श्रुतेषु कर्मसु क्तं फलं न गुण
युक्तं॥ ॥स्तोभः॥ ॥स्तोभस्य फलत्रयार्थत्वं विना स्तोभः फलात्फलांतरार्थत्वस्यत्वत्र फलसा
धने निधननियमस्य चासंभवात्करिष्यमाणविचारहेतुत्वेन स्तोभस्य फलत्रयसाधनत्वमाह
यद्विति ब्रह्मसामेति रक्ष्यत्स्तोत्रत्रयेम ध्यममित्यर्थः स्तोभस्य स्वरूपेणाफले विध्यभावाल्लिं
लन्यत्रकारकीभूतस्यैव विध्यवगमाच्च त्रेहंकारकमित्याशंक्याश्रयापेक्षेति वासवंतीया द्वेषम्यमाह
तथापीति नन्वानर्थक्यो वारवंतीयवाक्यवदेव कर्मांतरविधायकत्वं स्यात्तत्राह स्तकसंतरेति विषम्य
मिति वारवंतीयमित्यनेनैव विधेयगुणोपादानमित्यभिप्राये णोदंतनीयांतेनोक्त्वेन तदुपादानेन त
द्भावादिति बोध्यं निधनमिति पंचसा वोऽध्यायप्रतिहारोपद्रवनिधनाख्याः पंचसाम्नो भागा विभक्त
यस्त्वत्रांतिमामसमाप्तिरूपा निधनाख्या भक्तिः। निधनविशेषाश्चेति निधनसाधनविशेषा इत्यर्थः॥

भ१

हीषादयोवस्मादिफलार्थोविधीयंतइत्येवपूर्वपक्षकोटिः सौभरफलाभिन्नत्वंतुनतत्फलस्यार्थि
कमुक्तंतदपिफलभेदेपिविषसंगत्युसाधितइत्यध्यायसंगतिसूचनायेयद्वाभावनाभेदापवादाद
ध्यायसंगतिः अधिकरणसंगतिस्तुकेवलंवाक्येगुणफलविध्यसंभवेपीहतत्संभवदस्त्यानां
तंपाठतइतिशाखाभेदेनहीषादिप्रुक्ततयासौभरस्यपाठादित्यर्थः साधनेतिवृष्टिसाधनंयत्सौ
भरंतदर्थंहीषितिनिधनचतुष्कंपीत्यनिधनांतरमित्येवंव्यवस्थाविधौ वृष्टिकामादिशब्देस्तत्साधनेसौ
भरंलक्ष्यतेत्यर्थः नतद्दितित्रनेकावयवव्याप्तस्यतस्यातिमात्रवयवमात्रसाधनीभूतेनहीषादि
नाकर्तुमशक्यत्वादितिभावः ननियमेनेतिनिधनचतुष्कस्यंनरेषणपुवनार्संभवादितिभावः लक्षि
तेसौभरइतिवरंहिवाक्यभेदात्सक्षणेतिभावः ननुवृष्टिसाधनसौभरार्थतयाहीषितिशब्दस्यनिय
मस्तस्यनिधनसंबंधस्यविधेयइतिवाक्यभेदइतिशंकांनिरसितुमाह निधनसाधनत्वेनैवेतिपा
ठादेवहीषादीनांनिधनसाधनत्वेनप्राप्तेर्यथाप्राप्तिनेषांनियममात्रकरणान्नवाक्यभेदइतिभा
वः अत्रवृष्टिसाधनसौभरंनोद्देश्यंविशिष्टोद्देशदोषापत्तेः किंतुवृष्टिसाधनमात्रंतत्रप्रस्कृतत्वात्सौ

मरमेवेत्याशयेन सौभरोक्तिः नहीति श्रृंगांगिभावेऽन्नानर्थमात्तदंगन्यायसंभवात्सौभरार्थस्यापि पुरु
षशेषतयाविक्षिः संभवतीतिभावे च सिद्धेति नाराशंसप्रयाजस्य पुरुषशेषत्वं प्रतीयते न च फलकरण
दर्शपूर्णमासद्वारैव न साक्षादित्यर्थः एवञ्च फलमधिकरणं समाप्य वार्त्तिके यत्र क्वापि शाखायां या
मधीतस्य सौभरस्य वृष्टिफलं साधयतः हीषुशब्दो नियम्यते न तु पञ्चारणायां हि श्रुतिनिधनकं सौभरपठ्य
तेनच्छाखागतमेव वृष्टिकामस्योभयोक्त्यामेव स्वर्गोद्देशादूर्ध्वसेवं सज्ञाप्य सर्वशाखागतस्यापि सौभरस्य स्वा
वृष्ट्यर्थप्रयोगसंभवात्तत्र निधननियममात्रमिति पूर्वपक्षं कृत्वा निधनत्रयस्यैव न सौभरस्यैव तन्त्रनि
धनयुक्ततयाम्नातस्य तत्र फले नियम इति सिद्धान्तितं तन्न दूषयति यथा प्रासामान्ये ति शाखान्तराम्ना
ते सौभरे शाखान्तराम्नातस्य हीषादेः स्वरूपनाशभयात् प्राप्तस्य त्रात्रस्य नियमो न संभवति संभव
तिनु यो वृष्टिकामः स सौभरेणोत्यविशेषेणोक्तौ वृष्ट्यर्थेनया सर्वशाखागतसौभरप्राप्ते हीषुनि
धनयुक्ततयाम्नातमेव सौभरं वृष्टिकामस्येति नियम इति हीषादिस्वरूपेण सौभरव्यवस्थैवेयमित्य
र्थः प्रयोजनं पूर्वपक्षे सौभरस्य क्यानां ब्रह्मसामकार्यमिति नित्यस्य यदि वृहत्साम तिरात्रस्यासौ

शा० दी०
५०
50

मरमुक्थानांब्रह्मसामकार्यंयदिरथंतरसामासोमरंकुर्यादितिनैमित्तिकस्यचसौमरस्यसान्निध्यावि
शेषेणहोमादिगुणाश्रयत्वासंभवात्तत्रापिफलार्थेनहोमाद्यनुष्ठानेतथात्वस्यस्थैर्येपिसौभरे
त्रुगोदिप्रयोगःसिद्धांतेनेतिसूत्रेवृष्टिकामइत्यादिपुरुषसंयोगात्सौभराश्रितेहोमादौफलसंयोगः
॥ ॥ इतिश्रीचंपकनाथकृतेशास्त्रदीपिकाव्याख्यायांप्रकाशाख्यायांद्वितीयस्याध्याय
स्यद्वितीयःपादः॥ ॥शुभमस्तु॥ श्रीरामः पूर्वत्रकर्मभेदउक्तइहतदपवादःआधान्येऽपिइति
पाद्यइतिपादांतरत्वमानेनर्यंचसोमःसामइव्यक्तोयोगःअगछिन्नोविशेषितःनिमित्तत्वेनेति·
क्रतुविशिष्टरथंतरनिमित्तत्वपक्षेपिक्रतोर्निमित्तविशेषणत्वमात्रेणज्योतिष्टोमोनिमित्तत्वेना
नुक्तोस्तिनइत्युक्तिःकिमयुमितिएतद्वाक्यगम्योरथंतरक्रतुसंयोगःकिंयावतिक्रतौस्तोत्राणिना
वत्स्वतेकस्मिन्नेवेत्यर्थःतदर्थमितिआद्यकोटौकृत्स्नक्रतुसंयोगंविनाविशेषणत्वायोगात्क्व· श्रीरामः
सतिचतस्मिन्नप्रकृतक्रतोःकृत्स्नस्यरथंतरसंयोगाभावात्कर्मांतरत्वंद्वितीयकोटौरथंतरस्यावि ५०
शेष्यतयाकृत्स्नक्रतुसंयोगानपेक्षत्वात्कृत्स्नक्रतुसंयोगएवप्रकरणाद्भवतीतिप्रकृतज्यो

विशेषणत्वासंभवं वक्तुं विशेषणलक्षणमाह विशेषणमिति अयोगव्यवच्छेदकतया ४

ज्योतिष्टोम एवानुकीर्त्यत इति फलफलिभावः न तु कर्मान्तरश्रवणं पक्षे क्रतो निमित्तत्वाभावान्नित्यकोटिकत्वमिती
यसंबन्धाभावेन युक्त इति चेन्न । प्रधानस्याङ्गानुष्ठाने निमित्ततयानुपपत्तेः नन्वेति तत्र यदि रथन्तरेण स्या
दित्याकोबद्धृत्ताहेरन्यपदार्थप्राधान्याद्रथन्तरविशिष्टस्य क्रतोरेव ग्रहणाद्ग्रहणतया निमित्तत्वावगमाद् त
ति योजनातः किमित्याशङ्कमप्रकृतयागे रथन्तरस्य विशेषणत्वं निराकर्तुमाह विशेष्यव्यापीति
नीलत्वमुत्पलमित्यादौ विशेषणस्य विशेष्ये व्याप्यवृत्तिभावः । एकदेशस्थस्यापि कुण्डलादेर्विशे त्वमिति
षणत्वादुक्तं व्यवच्छेत्त्रीति तत्र देवदत्तैकदेशभूतकर्णस्थस्यापि कुण्डलादेर्व्यावर्तकत्वं देहव्यावर्त
कत्वाभावान्न विशेषणत्वमिति भावः विशेषणयोः क्रमेणाप्रकृते व्यतिरेकमुक्त्वा उभयव्यतिरेके हेतु
माह संतीति प्राजापत्यादिविधिवैयर्थ्यापत्त्या न तत्र व्यावर्तकत्वं अत एव न कृत्स्नव्याप्तिः गायत्र्या
दिसामप्रयुक्तत्वे शोरथन्तरव्याप्तेरभावादित्यर्थः फलितमाह तेनेति अव्यापित्वात् सत्वयोरेकदेश
संबन्धेन न तु स्वस्य नित्यमप्राप्ततया स्तासत्त्वाद्व्यावर्तनेन न विरोधि ब्रहत्व्यावर्तनेन वा विशेषण
त्वमस्क्त तत्राह सामानेति अत्र समासगम्याविशेषणत्वे समासस्य समर्थः पदविधिरिति शासना

शा० दी०
५१

तत्सामर्थ्यं च नैरपेक्ष्यं न च तत्सामानरसापेक्षस्याकस्य संभवतीति न विशेषणत्वमित्यर्थः विशेषणश्रा
द्धेभावसाधनः ननु कर्मान्तरत्वेन स्येदानीं विधीयमानस्य सिद्धवन्निमित्तत्वबोधकयदिशब्दानुपपत्ति
तत्सार्थं स्तत्राह रथन्तरमिति यदि रथन्तरसामा नेकं तु कुर्यादित्संबन्धेनार्थः आदिपदाल्लिङ्गः कामप्रवेदनार्थतया
प्रोक्तं वा यद्वा यानन्तरहीनु मितिच्छेत्तदा रथन्तरसामानं कं तु कुर्यादित्यादिप्रकारग्रहः यदि शब्दादिति स्व
रसतो निमित्तत्वप्रतिपादकयदिशब्दबलादित्यर्थः असत्त्वाभ्युदासेनायोगव्यवच्छेदेनेत्रन्ययो
गव्यवच्छेदोपि संभवतीत्याह यद्यपीति बृहद्रथन्तरयोरेकस्मिन्नपि पृष्ठस्तोत्रे विकल्पाभावेपि तत्सा
धनकयोः पृष्ठयोः क्रतौ विकल्पात्सामर्थ्यस्याप्येकक्रतावन्वयिपि त्वाभिप्रायविकल्पोक्तिः असा
अनपेक्षस्यैवेति मर्थ्यमुक्तं निरस्यति न चेति यद्यपत्र पृष्ठस्तोत्रं न श्रुतं तथापि रथन्तरसामास्य सोमयागस्येत्युक्ते
रथन्तरस्य साक्षात्सोमयागसंबन्धाभावादानर्थक्यं तदङ्गन्यायेन पृष्ठस्तोत्रद्वारा परंपरासंबन्धपर्यव श्रीरामः
सानात् रथन्तरसामेति निर्देशस्य पृष्ठस्तोत्रमात्रपरत्वात्तत्र धनैरपेक्ष्यादस्ति सामर्थ्यमिति भावः सिद्धत्वा ५१
भिमतं यत्तमाहाथवेति शब्दान्तरोक्तं विशेष्यत्वेन प्रतीतावप्यस्यायोग्यत्वात्तद्विशेषणस्यैव निमित्त

त्वेनास्यर्पमिस्याह नैवेति अत एव न विशिष्टोद्देशादोषः सन्निधानात्क्रतुगतस्यैव साम्नो निमित्तत्वाच्च
नातिप्रसंगः प्रथमपक्षे क्रतोर्निमित्तत्वेन निमित्तत्वायोगात्साम्नो विशेषणेपि अतो हविर्वा विशेषण ए
वन्न विशिष्टोद्देशदोष इति ध्येयं प्रयोजनं कर्मान्तरत्वे तस्य फलन्यायेन ज्योतिष्टोमांगत्वात् ज्योति
ष्टोमांगत्वेन केवलरथंतरसामकं कर्मान्तरमनुष्ठेयं सिद्धांते तु नैमित्तिकाग्रतामात्रानुष्ठानमित्या
दिकं बोध्यं स तत्र रथंतरसामेति साम्नः संयोगस्याशेषे कृत्स्नक्रतोर्भूतत्वात् स्यांतरसामशब्दस्या
पूर्वक्रतुसंयोगात्सामाक्षिप्तगुणः कर्मान्तरमाक्षिपेत्॥ अवेष्टौ॥ आदिशब्देनैंद्रमेकादशकपालमृषभो
दक्षिणा वैश्वदेवं चरुं पिशंगी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुं
शितिपृष्ठो दक्षिणेत्यस्य संग्रहः मध्य इति सर्वहविषामिति शेषः मध्ये निधायेत्यादेरैंद्रमित्यनेन
वैश्वदेवमित्यनेनापि संबंधः तत्रेति आर्यप्रसिद्धत्वात्सर्वलोकव्यापित्वात् म्लेच्छानामपि क्ष
त्रियादन्यस्मिन् राज्ययोगेन राजशब्दप्रयोगेणाविप्रतिपत्त्यभावाच्च राज्ययोगप्रसिद्धेर्बलवत्त्व
या राज्ययोगनिमित्त एव राजशब्दो न तु क्षत्रियत्वजातिनिमित्तः न त्वप्रसिद्धेरन्यार्थप्रसिद्धत्वात्

मी० टी० द्रविडदेशमात्रगतत्वादार्याणां जातिमात्रे प्रयोगाभावेन विप्रतिपन्नत्वाच्च दुर्बलत्वादिति श्लोकहृदयार्थः
५२ त्र्यय इति ब्राह्मणवैश्ययोरपि शास्त्रोल्लंघनेन राज्यप्रयोगदर्शनादिसाशयः नन्वेवं राज्यप्रयोगाद्रा
जाराजप्रयोगाच्च राज्यमित्यन्योन्याश्रयस्तत्राह राज्यपदमिति तत्रातिपुरोहितादिगुणाइत्यर्थः श्रा
द्धेतिनकुलनरवनक्षत्रादिशब्देष्विव व्याकरणं राज्यशब्देपि साधुत्वमात्रपरमित्यर्थः यदि शब्देति
अनेन पूर्ववद्यदि शब्दबलान्निमित्तार्थत्वमित्यत्र व्याख्यातं गतिः स्तदमेवेति राज्यलक्षणानिमित्त
निरपेक्षमेवेत्यर्थः यथाकथंचिदिति पूर्वाधिकरणपूर्वपक्षराशेरित्यर्थः अत इति पूर्वोक्ताभिषे
कविध्यनुगृहीतप्रयोगमूलकतया स्मरणस्य याथार्थ्यनिश्चयादित्यर्थः आचारस्य द्रविडश्र
योगस्य प्रसनेष्यतीत्याह यावत्प्रयोगस्येति शेषः ननु राज्यशब्दाद्ब्राह्मणवैश्ययोरप्याव्य
त्ययान्ताद्यकोमेयाजयेदिति वा कोऽविशेषः प्रयोगान्तरविधानान्यथानुपपत्तिमत्वाविशेषात्त्रयो
रपि प्राप्तिसंभवान्निमित्तार्थत्वासिद्धान्तेपि दुर्वारमिति चेन्नानत्र कामनयाकैकत्रोक्षेपात्प्राणेव राजसूय श्रीरामः
शाकाग्नाचेष्टिकर्तृक्षत्रियगोवनेराकांक्ष्यात्वा राज्यप्रयोगविधिसंगृहीतस्यापि क्षत्रियस्य कर्तुः ५२

52

प्रसंगादन्वाद्यकामप्रयोगेप्यन्वयोपपत्तेस्तयोरप्राप्यप्रापकत्वोपपत्तेः अत्र यदि ब्राह्मण इत्या
हिताकेनैकमन्तरविधिः प्रकृताविष्टिप्रत्यभिज्ञाविरोधात् किंतु ब्राह्मणादिविशिष्टप्रयोगान्तरवि
धिः एवं चान्वाद्यकामवाक्ये तस्यैव प्रयोगस्य फलापेक्षस्य फलसंबंधः नत्वन्वाद्यकामवाक्ये नैव
प्रयोगान्तरविधिरिति दृष्टव्यं यद्यपि यदि ब्राह्मण इत्यादेः आपकत्वे निमित्तार्थत्वे च बर्हिर्वेष्टौ त्रया
णामपि वर्णानां कर्तृत्वान्न फलभेदः तथापि तत्र वेष्टौ सर्वेषु क्षेत्रयाणां कर्तृत्वं सिद्धं ते तु क्षत्रिय
स्यैवेति फलभेदः मंत्रेऽवेष्टिविषयं यदि ब्राह्मण इत्यादिकं ब्राह्मणादिकर्तृकप्रयोगान्तरप्रधाने
स्यादेकस्यैव क्षत्रियस्य राजसूययज्ञसंयोगात् ॥ ॥ आधाने ॥ ॥ इह तर्हि प्राप्तार्थत्वान्निमि
त्तत्वमित्युक्त्यानात्संगतिः यद्यन्यत्र आधानप्राप्या ब्राह्मणादिश्रवणान्निमित्तार्थं तदा ब्राह्मणा
दीनामिव शूद्रस्याप्यस्त्याधानं यदि तु ब्राह्मणादिवाक्यान्येवाऽधानविधायकानि तदा शूद्रस्य
पृथगाधानविध्यभावान्नाधानमित्यधिकरणप्रयोजनं एतच्च नोपपन्नं ब्राह्मणादिश्रवणस्य
निमित्तार्थत्वेपि शूद्रस्योपनयनाभावेन विद्याभावादेवाधानेधिकाराप्रसंगादित्याशंक्य प्रयो

जनसिध्यर्थतयोदाहरणं तत्र माहेन्तद्यथेति पूर्वपक्षे स्वस्याप्युपनयनस्य संभवादृत्विग्योजन्म
सिद्धिभावः फलकामनया कृतत्वेः प्रसज्यंते क्रतुमिश्चाग्निविद्यैतान्याभ्यासाधानोपनयोर्नतश्च
स्वस्याफिफलः कामत्वादस्याधानादिकमित्यभिप्रेत्याह तत्रेति नेत्रेति उपनयनस्य विद्य
याक्षेपसंभवेपिनाहवनीयेनाधानाक्षेपः तयोर्लौकिकतः कार्यकारणभावासिद्धेरितिशंकते कथ
मिति परिहरति वेदीमोहमतिवेत्तिगुणवाक्येनाधानस्याहवनीयादेश्चाद्वितीययासाध्यसाध
नभावावगम इति प्राप्ति वेदीमोचयतिपादादिलिनिसामर्थ्यं परिहरति तन्नमायास्तीति वचनक्तादिना
मनक्ताकित्गुणमात्रविधेर्नाधानविधिस्तत्कृतश्चाहवनीयादेराधेमेसाध्यत्वप्रतीतिचविधा ति:स
वाधिनस्यफलाकांक्षाया स्ववाक्यगताभ्यां दिभिरेवशांतेषोचितत्वाहन्ननामेधानसाध्यत्वेमि
ठेतद्वाक्यस्याग्निशब्दः गुणवाक्येग्नीनामाहवनीयादिशब्दैराधानसाध्यत्वानुवादबलाद
हवनीयादिपरइतिभवत्याहवनीयादेराधानसाध्यत्वनिश्चयः विध्यभावेतुनसंस्कृत्यस्वरसाहा श्रीराम
हेत्यथवेतिकालमात्राभिनिकर्त्तव्ये नब्राह्मणादीनामिवकालत्वेनवसंतादेरपिप्राप्तिसंभवा ५३

द्वसंतादिकालेनिमित्तेब्राह्मणादिकमेवनाविधीयतेसर्वेषांवसंतादिवाक्यानामाधानप्रापक
मित्यर्थः यदिशब्देति यदिशब्दादिसत्वेधात्वर्थस्यप्राप्तत्वावगमाद्विधिप्रतिबंधः एवंप्रत्यभिज्ञा
यामपिप्रकृतेचतदुभयाभावादप्रसक्तःकर्मविधिरित्यर्थः बलादितिप्राप्तत्वेहिक्रियायावि
ध्यसंभवाद्यदिशब्दाद्यभावेपिप्राप्तार्थत्वमात्रेणब्राह्मणादिश्रवणस्यनिमित्तार्थत्वंस्यादि
प्रा त्यर्थः श्रौत्रिमेवोपपादयतिक्रतुविधाइत्यादिनानतेनैवेतिअग्निसाध्यकर्माधिकारिसैवेत्य
र्थः सतिहिविधावादधीतेत्यात्मनेपदबलेनाधानसाध्याग्नीनांकर्तृसंबंधप्रतीत्यास्वीयाधा
नसाध्यत्वंस्यादितिभावः तथेतिपवमान्यध्ययनस्यविहितत्वात्तस्यचयत्कर्मनुपेयसक्रतुमग्निका
त्वादुपनेयनापेक्षेपः संभवतितथापिप्रत्यक्षविधेर्मत्याक्षेपोनुचितः ब्राह्मणविशिष्टोपनयना
नुवादेनवसंतादिकालविधौचविशिष्टानुवाददोषइत्यत्रनात्पर्यसामान्यमितिएवंविद्वानितिवि
वचनमित्यर्थः सर्वेष्वाधानविषयेवसंतादिवाक्यंप्रापकमेवअसर्वेशेषत्वादाधानस्यकेचिदपि
क्रतुंप्रतिशेषत्वाभावेनक्रतुविधिभिराक्षेपतःप्राप्त्यभावात्॥ ॥अयने॥ ॥वसंतादिवाक्ये

श्राधानमिवात्रापि कर्मान्तरं विधेयमित्युत्थानात्संगतिः साकंप्रस्थानमाहृत्निश्चगुणइत्यन्वयः
वाऽत्रशेषादिनिर्दिष्टपौर्णमास्येष्टेरमावास्येष्टेश्चेत्येतस्मात्समुत्कर्षाभिमिश्रमिक्षामेज्जुहोतीत्येतस्माच्चवा
क्यशेषात्पौर्णमास्यमावास्यावृत्तिलक्षणगुणस्यकुम्भीभिः सहप्रस्थानरूपस्य चगुणस्यप्रसि
द्धत्वाच्चदक्षस्योत्साहिनोयजमानस्यैमेदाक्षाकृत्विजस्तेषामयनमावृ(त्तिरावृत्तिनहतोरभेदवि
वक्षयायज्ञसामानाधिकरण्येनतस्यदक्षयजमानेनबधिकर्तृत्विक्कार्तृकात्मकयज्ञइत्यव
यवव्युत्पत्त्यासाकंप्रस्थायः सहप्रस्थानेनतन्त्रबधित्वात्साकंप्रस्थाय्यीयइत्यवयवव्युत्पत्त्या
चोक्तगुणयोः प्रसिद्धत्वान्नहूचननामनयोश्शब्दयोरवगम्यतइत्यर्थः विधातव्याविति त्वोहि
तोक्तशेषादिवृद्ध्युपसर्जननविधिरितिभावः प्रयोजनंपूर्वपक्षेदर्शपूर्णमासाद्बहिः सोम्यादिवृद्धाक्षा
यणस्यत्वादेः प्रयोगः सिद्धान्ते तस्यैवगुणान्विहतुंप्रयोगमात्रस्त्वेवैश्वदेवेषुदाक्षायणादिवाक्ये सं ५
षु॥ ॥संस्कारः॥ ॥ईषानिवीपार्श्वेवाकर्षेवयवोदाहविशेषः आलभेतसंस्पृशेत्तत्रमार
भ्योक्तिः कर्मान्तरत्वप्रसिपादनसोकयीयफलायगुणविध्यसंभवार्थाचितनस्वसुक्तेपूर्वे

त्रसान्निहितत्वात्फलाय गुणविधिः इह त्वनारभ्यविधानात्प्रकरणादाश्रयलाभात्फलाय गु
णविध्ययोगात्कर्मणि गुरोणागुणविशिष्टकर्मान्तरं वा विधीयत इति प्रत्यवस्थानात्संगतिः या
वदुक्तं श्रुतमात्रेते एवाहा निर्वपणमिति यागविधानमिति अतोपि गुणफलवैशिष्ट्यं सन्नेयं इतर
दिति सोर्थवादं वाक्यव्यावर्त्यं च इत्यर्थः सर्वेति विश्रोषधिवनस्पतयोन्व प्राणभृतोन्ताहेद इति श्रुतौ
प्राणभृतां वनस्पतिभोक्तृत्वादगमात् वनस्पति संबंधिनः प्राणिनोयो देवतालोपचारेण वायव्य
शब्दोनुवाद इत्यर्थः तेजोदेवत्यत्वेति ततश्च सोर्थशब्दः आग्नेये गोरण इत्यर्थः तार्ह इति अनारभ्या
धीतानां प्रकृतिगामित्वादिति भावः ननु आग्नेयस्य पुरोडाशात्मत्वान्न चरुविधिः शक्यस्तत्राह चरु
शब्द इति पाक्षिकेति सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति सार्वकाम्यस्य प्रयोगभेदाधीनत्वात्
स्यादेः पाक्षिकत्वमित्यर्थः आनर्थक्यमिति अनुवादस्य प्रयोजनाभावादिति भावः लोकेपि चे
ति अव्यभिचरितक्रतुसंबंधाभावान्न प्रकृतिगामित्वमिति भावः उक्तमिति अर्थाद्वा कल्पने
त्यत्रेति शेषः ननु प्रकृतावग्नीषोमीयपशावालंभस्य स्पर्शस्यार्थिकत्वाद्दार्थिकत्वस्य वचो

दकाभावान्न चोदकान्नम्यामिरतन्याहा यीहीतिप्रकृतिवदेवइहाप्यार्थी प्राप्तीतिभावः सत्रेऽत्र प्रक
रणेऽनारभ्याधीनेवाय व्याहितवाक्ये पोर्णमासिकः संस्कारएवानूद्यतेन यागविधिः यागस्यश्रवा
भावात्॥ ॥विषयो॥ ॥दोहाधिकारेदोहश्रस्तावेऽत्र पूर्वपक्षस्यामंदत्वान्नस्युदाहरणमात्र
त्वमित्यनास्थया संशयानुपन्यासः प्राणीनिवत्सालंभोयजिमत्कर्मप्राणिद्रव्यकालंभत्वा
दितिसामान्यतोदृष्टानुमानादित्यर्थः सतिचयागविधित्वाध्यवसायेप्राणिद्रव्यकत्वेनाग्री
षोमीयवद्ध्यंतयाप्यादेवतालाभइतिभावः ॥सामान्यतोदृष्टस्याध्वर्युमालभेतेत्यादौस्पर्शमा
त्रविधौव्यभिचारान्नयागविधिरत्रेत्याशयेनसिद्धांतयतिआलंभोनमेतिविधीयतइतिनचस्पर्श
मात्रमर्थिकत्वान्नविधेयमितिवाच्यंप्रस्तवनोपयिकचाटुकरणात्मकस्पर्शविशेषलक्षणसंस्का
रस्यआर्थिकत्वाभावादितिभावः ॥प्रयोजनेपूर्वपक्षेऽग्निहोत्रांगतयाकस्यचित्पशुयागोऽनु
ष्ठेयः सिद्धांतेवत्सचाटुकरणंस्वेयागविधिः संस्कारविधिर्वेतिसंशयेसंस्कारमात्रंयथाश्रु
तेविधेयंदोहनादिसंस्कारप्रायपाठात्॥ ॥संसृक्ष॥ ॥नीवाराइतीतित्र्यग्नोस्त्रुयइतिशेषः

उत्पाग इति उपधानप्रयुक्तोऽयाग इत्यर्थः आद्यकोटौ उपधानमात्रमिति पात्रचोऽप्रयोगात् देवता
न छिन्नोपयुक्तोस्याहनेति स्रिस्याणमिति अत एव पूर्वपक्षेणोत्थानात्संगतिः स्थंडिलेति। चरूपधानं प्र
करणात् स्वमूर्तं तदंगत्वं च स्थंडिलनिर्हरणस्य पत्नीयेवृसा वचचरुहूतास्या क्षान्त्रथा चोपधानलक्षणसंस्का ग२
रविशिष्टबलादेव उपधेयचारोरप्युपधानसाध्यं स्थंडिलनिर्हरणो विनियोगकल्पनादुपहितेन च हरणं
स्थंडिलं निर्हरेदिति वाक्यार्थः एवं चानेनैव वचनेन चारोरपि विनियोगात् संस्कार्यत्वं संभवतीति
द्वितीयोपपत्तिरिति भावः। नैमित्तिरीयेति प्रागदीव्यतोऽपार्थे विहितण्यप्रत्ययान्तत्वेनाप्युपपत्त्यो
बार्हस्पत्यस्य हृ इति भावः स्त्रेचस्र यंशाहृन कार्यशब्देनउपहधातिना संयुक्तस्तदर्थ एवं तु
यागार्थः श्रुतिसंयोगात् उपधानार्थत्वेनोपधानसंस्कार्यस्यापि चरोरार्थिकसाधनत्वाभिप्राये
णबोध्यं॥ ॥पत्नी॥ ॥इष्टाविधोपात्तीवतमिति देवतास्थवृणघातांतरत्वमित्युत्थानात्सं
गतिः पूर्वत्रेति त्वाष्ट्रवाक्यविहितकर्मणीत्यर्थः। पर्यग्निकरणं तांगरीति विधिः पर्यग्निकरणं
तांगानुष्ठानविधिः पर्यग्निकरणं तांगकलापविधिरिति यावत्। तदर्थे मेशायस्यायमर्थः उत्क

तस्यापीति॰ देवतोद्देशेन द्रव्यत्यागात्मकयागोऽस्मिन्वाक्ये यागरूपस्योपस्थितस्य सिद्धत्वादि त्यर्थः

पा१

प्रा॰ टी॰ जंतीति प्रत्ययार्थविधेः किं क्लीबत्वेनान्वयः किं वा पर्यग्निकृतेनेति संशये पूर्वपक्षे पात्नीवतं कुर्यादिति

५६ वाक्यार्थोऽत्र यज्ञ्यायेन द्रव्यदेवतासंबन्धाक्षिप्तयागविधिः पर्यग्निकृतशब्दश्चोदकप्राप्तपर्यग्नि

करणानुवादः उत्सृजन्तीति धातुस्तु यागविधिबलाद उत्सर्गप्राप्तेः प्रत्ययानुग्रहमात्रार्थः सिद्धान्ते उत्सृ

56 अं४ जन्तीत्यपूर्वयागानुवादादुत्सृजन्तीति यजतस्य पर्यग्निकृतमिति वाक्यार्थः मनोतेति त्वष्टारमग्नेऽनुथ सोम नो

नेति मन्त्रस्याग्निशब्दो यथाग्नीषोमौ लक्षयति तथा पात्नीवतशब्दप्रकृतिभूतपत्नीवच्छब्दोपि त्वष्टपत्नी छ॰ ५

वत्त्वलक्षकः स च पूर्वयागमुपस्थापयतीत्यर्थः अभ्युपेत्यवादं त्यक्त्वा निरपेक्षस्यैव देवतात्वमसमाभ

ज्ञासुलभेत्याह न चात्रेति आग्नेयवदसामर्थ्यमप्यत्र नास्तीत्यर्थः युगपदिति तत्र श्रैकक्रियाव

शीकारादन्योन्यनियमलाभ इति भावः प्राप्तो वेति तत्र आग्नाग्नपरिसंख्यात्वान्न तत्रे दोषापत्ति

रिति भावः गृहमेधीयवदिति यथा गृहमेधीये यागे आज्यभागौ यजतीतिक्रमप्राप्तो नोपकार श्री एम॰

ज्यभागाभ्यां निराकांक्षत्वान्नातिदेशमपेक्षते तथेत्यर्थः नन्वेवमपि पर्यग्निकरणमात्रविधिः ५६

स्यात् तन्नतु न तदंतो गरीति विधिः अंतशब्दाभावादित्याशंक्य तथापि भूतकालार्थनिष्ठाबलादेव

तदंततालाभइतिपरिहरति॥ आक्षेपोक्तमिति नन्वपि पात्नीवतविशिष्टोत्सर्गानुवादेन दंतोगरीतिविधौ वि
शिष्टोद्देशाद्वाक्यभेदः स्यात्तत्राह प्रहृतेति सत्वेप्यग्निहुतं पात्नीवतमिति वाक्ये प्रत्यभिज्ञायमान
पूर्वकमेवत्वात्तदंगागरीतिविधानेनेतरेषामभवइति॥ ॥अद्रव्य॥ ॥हविषेति हविषा सोमेन
हविः सोमे परे नीयत्नयः न शृणतीत्यर्थः अनर्हत्वात्संकल्प्यादिषुनुपयोगार्द प्रकृतादिति अनएव
पूर्ववत्प्रत्यभिज्ञाविरहाद्यागानरगविधिरित्युत्थानात्संगतिः आनंतर्यश्वेनरश्रुतत्वातेत्रत्रश्रुतत्व
रूपविशेषाभावाद्दशुवाक्येयत्रिं व्याहृत्रिरदाभ्येनुख्या ननर्यरूपविशेषणाभावादित्याह अशाविति न
नचतुर्जुहोगृह्णातीत्याहो गृह्णाते देशोपूर्णेभासयोरपि दर्शनात्ततो ज्योतिष्टोमागन्वेलाभः इ सम
रसादाहायवेतिवा कामितिदेवावेयद्यद्धेकं वेनूनदसुराष्ट्राकुर्वते देवा दाभ्ये छंहोसि सवन्यानि सम
स्थापयन्निति देवावेषबाह्यग्रहानगृह्णत स एतं प्रजापतिरंशुमपश्यत्तमगृह्णीत त्यादिहेवेति शेष
सत्त्रेद्रव्यदेवतयोरलाभात्केवलेगृह्णातौ ज्योतिष्टोमककर्मांगविधिरिति॥ ॥अभिसत्क॥ ॥विषय
वाक्यसत्कार्पूर्वोत्तरपक्षसौकर्यार्थमाह तत्रेमानौ तिगुणोविधीयत इति यद्यपि एवं विद्वानग्नि

श्रा॰टी॰ ५७ चिनुते इति वाक्ये चयनमात्रं विधीयते न तु ज्योतिष्टोमादिगुणोऽपि श्रीवत्सविप्रचरितं तेन
५७ तथा चिनस्य चयनस्य स्वार्थत्वेनाग्निमित्यादिवाक्ये ज्योतिष्टोमाद्यंगभावावगमात् ज्योतिष्टोमेण एभ
57 ते ननु स्वतंत्रामिति द्वितीयपक्षाक्षेदं प्रदर्शनाय गुणगुणमाह तस्मात् इत्येतिदं व्यवच्छनले अग्निसंस्का
रो वा ज्योतिष्टोमादौ गुणः विधिर्वा फलमिति विवाद्यं पूर्वं वैषम्यपत्रा प्रत्यवस्थानाम्नातिरिति सूचयन्
पूर्वपक्षमाह तत्रेति ॥ ॥ अग्निर्विति अश्वदाभ्ययोर्मन्त्रितिरीयशाखायां ज्योतिष्टोमप्रकरणे पुनः श्रे
कीर्तनादित्यर्थः छित्वा नपक्षं निराकृत्य द्वितीयपूर्वपक्षं दूषयति तदभावे चेति चिनोतीति इष्ट
कावासमिष्टकाविशिष्टस्थानविधायकं तच्च प्रकरणाद्यएवं विद्वानिति विहितयागमभिति तद्वा
काग्राम चयनानुवाद श्चिनोतीति रित्यर्थः सत्ययैवेतिश्चाह वनीयाद्यग्निप्राप्ते सत्यसम्बन्धन्यायेन
नामत्वमिति भावः अथात इति अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तं षोडशिना तमाते
रात्रेणातं द्विरात्रेणेत्यादीति चतुर्दशवाक्यानि तत्राद्यवाक्ये अनुयजन्ती त्यनुयज्यते न
माग्नोति चत्वारि अग्निनामकयागस्य संस्थाविधिपराणि तं द्विरात्रेणेत्यादीनि दशकालवि श्रीरामः ५७

धिपराणि। अत्र सर्वेष्वकामेष्वप्यजनित्वानुवादो यागसामानाधिकरण्येनाग्निष्टोमशब्दस्य यागना
मत्वादुत्तस्त्वावप्याग्निष्टोमशब्दो ष्टाशेयागनामधेयमिति भावः। संस्थाविधिपर इत्युपलक्षणं कालविधिप
अ०३ र इत्यपि बोध्यं। शब्दहृदूष्टकावाक्यप्रोमनच्य नानेनर्थस्य परेतेनेतिवाक्यावगताग्निष्टोमाननं तर्यस्यानु
वाद इति भावः। संस्थाविधित्वाभावेपि यागविधिमुपपादयति। अथापीत्यादिना। सिद्धांते इमानि वाक्या ५४
न्यग्निविनियोजकानि तत्राग्निष्टोमसंस्थायाः अनवर्थत्वाद्धाने न स्वादथ्यासंभवादग्निष्टोमसंस्थे
नयागेनेति तत्रैव यागलक्षणा। उक्थ्यादिवाक्येषु उक्थ्यादिशब्दानां संस्थापरत्वमेव। ननु तद्गु
णकयागपरत्वं तासामपि वफलवत्वेनाग्निप्रतिशेषित्वसंभवादिति धेयं। अत्रोक्ति विहृहाकमेइत्यर्थः
न त्वत्राग्निविधिरिष्यते येनाहवनीयादिशास्त्रादेव विधिरिति तयागप्राप्तेर्नमत्वं स्यात् किंतु प्र
सिद्धास्यनुवादे न तस्य संस्कारो वैयाधिकरण्येन विधीयते तत्रात्र ननन्य स्वान्याय इत्याशयेनाह
तेनेति। तथा याच यागविधेरभावादग्निष्टोमादिवाक्यानां न संस्थाविधिपरत्वमित्याशयेनाह त
स्य च संस्कारस्येति तेन ज्याक्रतु संबंधविधिपरत्वमुपपादयति तत्रेति। अनुशाह्यः पश्चोक्तावमाहेत्यु

श्रा॰ दी॰ ५८

काद्याग्निचयनानंतर्यगुणविशिष्टं तद्वाग्यन्त्याह तेन चयनसंस्कृत इति एवं चाग्निष्टोमादिवाक्येषू
क्तेयजिसामानाधिकरण्यं मन्वानो भिन्नत्वाह न त्वत्रेति सूत्रे ग्निष्टोमशब्दो यागनामतो येनाग्नेः स्तोत्रमग्नेः
शस्त्रमिति स्तोत्रादिषु क्ततया निर्देशस्य लिंगदर्शनात् स्तोत्रशस्त्रयोः क्तत्वेक्तसंबंधित्वादित्य
र्थः स्तोत्रशस्त्रवाक्ये नुपपत्तिबलाल्लक्षणयाग्निशब्दस्य तद्युक्तक्रतुपरत्वमात्रेणाविद्वद्वाक्येग्नि
शब्दस्य यागनामत्वं नास्तुपेयमिति सिद्धांताशयः॥ प्रकरणा॥ गुणाभेदेति अर्थवादस्यादिविचार
स्य प्रासंगिकत्वात्तत्र पक्षद्वयेपि कर्मभेदात्तस्य वचनामभिधेयत्वात्तस्मादिति इष्टव्यो यदाहवनीये जुहोती
त्यादिवाक्यस्यार्थमनुपादेयसमभिव्याहृतेनेत्युक्तं अनुपादेयं असाध्यं ननु मासस्य कृत्यकृत्य
संपादनयाऽनुपादेयस्य कृत्याविधेयत्वमित्याशंक्य मासस्यानुपादेयतया यो मासस्तत्र होमं कु
र्यादित्येवं शाब्दतो मासोद्देशेन कर्मविधिप्रतीतावप्यर्थात्पक्षयातिलाद्धिधेः कर्मणि मासस्य
वश्यविधेय इत्याह अनुपा॰ देयमिति भाष्ये अर्थात नतः प्रतीयमाने प्रकरणांतरशब्दार्थमाहासंस्
कृतेति प्राग्गत्वात कर्माभिधानं प्रागवगतकर्मानभिधानमिधानमिति वार्थः अग्निहोत्र

श्री रामः ५८

58

शाब्दाकांक्षस्थितेःकृत्वादिदमयुक्तमितिइत्याशंक्याहकथमितिवाक्यभेदप्रसंगात्त्याज्यासेतिपरि
हरतिउच्यतइतिनन्वेवंगुणा[illegible]नेमित्तकस्यैवभेदःस्यात्तत्राहाद्यचेतिगुणाद्धितिप्रकृतकर्मस्थं
वेष्ठादितिभावःसर्वत्रेतिसंस्थान्यत्वातिरिक्तस्थलइत्यर्थःशाखांतरादीनांसाक्षाद्दैकत्वाभावे
पिपरंपरयात्वदस्तीतिशंकतेऽथेतिद्वारद्वारिभावापन्नयोर्द्वयोरप्येकविषयत्वादेकपरिग्रहण
नैनैवेतरस्यार्थसिद्धेर्द्वयोःसहग्रहणंनस्यादित्याशयेनाहनद्वेतिउपकरणांतरंहीत्यर्थः
वार्तिकोक्तप्रकरणांतरशाब्दार्थमनुपक्षिपतिकिंत्वितिपूर्वकर्मसन्निधानमितिसमीप
पूर्वकर्मणोविहितत्वाभावात्इत्यर्थःनैववुद्धौविपरिवर्तितेनप्रत्यभिज्ञापनमेवेत्यर्थःतथाचय
त्रपूर्वकर्मसन्निहितेतत्रतस्यैवप्रत्यभिज्ञानात्तदनुवादेनगुणविधिर्यथादध्नाजुहोतीत्या
दौयत्रतुकर्मनसन्निहितंतत्रपूर्वकर्मप्रत्यभिज्ञानाभावेननतत्रगुणविधित्वासंभवोयथोऽधि ज्ञावार
करणन्यायेनधात्वर्थविध्यवपूर्वभावाद्विहितस्यविध्यव्युपपत्त्याकर्मभेदसिद्धिरितिभावः

ननुएवंकर्मणोऽसन्निहितत्वेपिसगुणस्यैवतोगुणाकृष्टवाक्यत्वाद्विधेयत्वेइहइवनीयेज्जुहुतिइत्यादौ
जुहोतिशब्देनकर्मोपस्थितिमाश्रित्यतत्रगुणविधिरिष्यतइहकिंनस्यादित्यत्राहशङ्कोहितिश्च
सन्निधानादिहेदंस्त्वत्वगेरूपादेयगुणाश्रवणेऽत्रपदार्थ्यनुपादेयगुणस्थलेनक्षतिरितिभा
वःनत्वसन्निधानाविशेषेउपादेयत्वानुपादेयत्वाभ्यांकोविशेषइत्याशङ्कांनिराकुर्वन्श्लोकं
व्याचष्टेअसन्निहितमितिकथंचिद्धितिविशिष्टविधिगौरवभियाकर्मणउद्देश्यत्वेवश्यंभावे
केनचिद्विधिभिधानाद्युपायेनेत्यर्थःउपादेयगुणस्थलेकर्मोद्देशेनगुणविधिःसंभवतीतिद
र्शयतिनत्वहीतिप्रकृतेवैपरीत्यमाहयत्रेतिकुतोऽसंभवस्तत्राहयागादीतिहोमंकपोद्दिश्येतियत्र
न्मासमिसेवंद्रव्यस्यकर्मोपस्थानंस्यादित्यर्थःअस्तित्वतत्राहनथाचेतितदप्यस्कन्दप्य
स्कंतत्राहनहीतिअशक्योफलितमाहतेनेवेतिमासोद्देशेनकर्मोपादानेपिकर्मणस्त
त्रैवकर्तव्यतायांनस्कर्मविशिष्टतयैवमासस्यविधेयत्वंमासेकेर्मणोऽनुष्ठेयतामात्रेणैवपरोद्देशा

मुख्यत्वकृतिव्याप्यत्वरूपं शेषत्वं च मासस्योपपद्यत इति भावः ननु पौर्णमास्यां पौर्णमास्या यजेते
त्यादौ कालो देशो न कर्मणा उपादेयस्तेपि न कर्मांतरत्वं तद्वत् किं न स्यात्तत्राह सन्निधानेति ॥ दे
शमध्ये सन्निधौ तद्विभागादित्यत्र वक्ष्यत इति भावः ननु सान्निध्याभावेपि नाम्नो विपरिहृतिः सं
भवतीति न नत्वु प्रसिद्धाग्निहोत्रेऽगुणादेयतया मासस्य विध्यसंभवेपि प्रसिद्धाग्निहोत्रस्येव नाम्नाय
स्यापि तस्य कुंडपायिनामयनागतत्वे न विधिर्भविष्यतीत्यभिप्रायशंकते नन्विति नास्य धात्वर्थस्यो
पस्थितिं तस्य चोक्तागिधिमभ्युपेत्य परिहरति भवतीति अग्निहोत्रादिशब्दस्य धात्वर्थमात्रवाम
त्वेन भावनायास्ततो विपरिहृत्य संभवात्तद्दोषोऽपरिहार्य इति भावः अभ्युपगमं त्यजति धात्वर्थो यो
हि विधेरिति विधास्यत एवेति शेषः तथा च न येयमुपस्थितिर्विध्युपयुक्तेति भावः औदिवादेन वार्तिको
क्तं सर्वत्र भावनाभेदपक्षमाह नन्वभेदेणेति प्रयोजनं पूर्वपक्षे प्रसिद्धाग्निहोत्रे यावज्जीवादिकाले मा
सस्य विकल्पः कुंडपायिनामयने अग्निहोत्राऽननुष्ठानं च सिद्धांते तदुभयाभावः सर्वत्रेत्र प्रयोजनशाद्बोधा
त्वर्थपरो भावनापरो वा ॥ ॥ फलं ॥ ॥ पूर्ववदित्यनेन पूर्वं न्यायान्तिदेशान्तं गतिरिति सूचितं यजे

मा२

मानसंस्कारत्वाच्च कथमुक्तं तदभावात्कथं तत्रैवाधानवीयायां तस्य विधिरिति शंकां वारणार्थमुक्तं दीक्षणीया
कार्येति दीक्षणीयायास्तु तत्कार्ये यजमानसंस्कारलक्षणार्थ इति भावः। अतिदेशस्य विशेषशंका
वारणार्थत्वात्तमाह यः पूर्वत्रेति तन्नैवेति परप्रकरणागतत्वलक्षणापकरणान्तरमेवेत्यर्थः तथा च
न प्रकृतेऽनारभ्याधीतेतदस्तीति भावः अस्य प्रकारस्यात्रैवाधानवीयायां काऽऽव्यानान्यप्रकारान्तरमा
हयोवेति ननु पुरुषप्रवृत्त्या विषयस्य फलस्य कथमनुपादेयत्वं तत्राह शक्तत इति कामनानुरवेन
फलस्यापि तद्विषयत्वमस्तीति भावः दर्शपूर्णमासस्थेन यजमानेन तत्कामसंपादनवत्का
म्यत्रैवाधानवीया उपयोगेऽेवाश्वमेध यजमानसंस्कारस्यापि संपादयितुं शक्यत्वात्तत्रापि न क
र्मान्तरत्वमित्यनेनैवोक्तप्रायं मासादिवदिति आदिना देशनिमित्तयहः तयोरपि प्रागेव सिद्धत
यानुपादेयत्वाद्दनएव देशकालनिमित्तानि पूर्वोधिकरणएवोक्तानि इदं तु फलसंस्कार्यविष
यमिति भावः आद्यप्रकारं निरस्यति पूर्वत्रापीति स्वर्गसाधेति कामनायास्स्वरसे सिद्धत्वात्कृत्यवि
षयत्वादनुपादेयत्वान्न स्वरवेनापि फलस्यानोपादेयत्वं किंतु हेयत्वमेवेति भावः उद्देश्यत्वेपि देशा

द्विरुद्धिधेयमस्त्कत्वात्फलत्वेनिव्याघातमेवोपपादयन्निविधीयमानमितिंदेशकालयोरुद्देश्यत्वेपिक
र्मणःसत्त्वात्तदुद्देश्यतयान्नहिविशिष्टवेषेणविध्याधीनप्रवृत्तिविषयत्वाद्विधेयत्वंफलस्यतुनतथाविध्याधी
नप्रवृत्तिविषयत्वेस्वारसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वंव्याहन्यतइतिभावः संस्कार्यस्यापिवि
ध्यंतरसिद्धस्यफलवदुद्देश्यतयातद्देवप्रधानत्वान्नव्याघातप्रसंगान्नविधेयत्वमित्याह एवमि
तिपूर्वेत्राग्निहोत्रनामधेयेनाभेदशंकोन्मिषतीत्याहतस्यापिनास्तीत्याहनचेतिप्रयोजनेपूर्वपक्षे
कर्मणामार्थेनपृथक्प्रयोगःकिंतुगुणफलवद्दर्शपूर्णमासप्रयोगेएवतत्सिद्धिः सिद्धांतेतुकर्मान्त
रत्वात्पृथक्प्रयोगः॥ ॥सन्निधौ॥ ॥अनुपादेयसहकृतामसन्निधेभेदकत्वेऽभिहितेफल
मात्रप्रत्युदाहरणायोगात्तत्रैवफलग्रहणंभाष्येतदुदाहरणांचोपलक्षणमितिदर्शयन्संगति
माह सर्वेषामितिसमंइत्यादीनित्रीणिनामानिदर्शपूर्णमासयोर्देशकालनिमित्तपरत्वेना अवेष्टेः
फलेपरमेतयेनिवासंस्विष्टकृतेयजतीतिविहितस्विष्टकृद्यागस्यसंस्कार्यपरंशेषादितिवाक्यमिति
विवेकः नन्वपाद्यत्वमात्रेणाकथंविधेयमित्यतः श्लोकंव्याकुर्वन्नाह विधानमिति अवघ्यपामि

शा॰ दी॰ ६१ 61

स्मा

तिउद्देशस्यैवोपादेयत्वासंभवादिति भावः सत्यपीति तत्र स्वकर्मभेदेऽनुपादेयसंबंध एव प्रयोजको
न त्वसन्निधानमिति पूर्वोक्तमनुपादेयसंबंधस्य सहकारित्वमसन्निधेर्भेदकत्वं चासुक्तमित्या
क्षिप्यत इति भावः अत एव संगतिः उपादेयस्यापि विधेयत्वनियमो नास्तीत्याह निर्देशेति व्रीहीन्
प्रोक्षतीत्यत्र व्रीहयस्त्वानिति स्वप्राधान्येन निर्देश्यत्वरूपं स्वांतमुद्देश्यत्वेनान्यो क्षेपादिति नेत्यरे
नेत्यत्र तया निर्देश्यत्वमुपादेयत्वमित्यर्थः ननु कर्मणोऽनुवाद्यत्वाद्देशादेश्चोद्देश्यत्वात्कस्यापि वि
धेयत्वाभावे वाक्यमपि विधायकं स्यात्तत्राह तस्यापि तदेशकालयोर्न फलवत्याधान्येन प्रयो
जनभावेनोद्देश्यत्वं किंतु दध्यादिवदानयनादिक्रियाविशिष्टतयानुष्ठेयत्वाभावमात्रेण स्वा
तंत्र्येण निर्देश्यत्वं मतस्य फलवैलक्षण्येन विधिसंभवात्समप्रेम्याचतयोः शेषत्व प्रतीतेः कर्मा
र्थतया तद्विधिपरमेवेदं वाक्यमित्यर्थः निमित्तेति तेषां विधेयत्वे देशकालयोः कर्मांगत्वापत्तेरिति
भावः असन्निविधिभेदस्य कर्मभे[illegible]दप्रयोजकत्वमुपपादयति कर्मस्वरूपेति संभवमेवोपपादयति क श्रीएम
र्तव्यतेति फलेति फलविधेर्निमित्तवाक्यवदधिकारविधित्वापि कर्मणः फलशेषत्वसत्त्वाद्विनियोगोक्तिः ६१

एवं च निमित्तात्रिद्विकालत्वेऽप्यधिकारविनियोगविधिवद्देशकालवाक्ययोः कर्मण्येव विधिस्वीकारेऽपि प्रयोग
विधिरेवायं स्यान्न तु तत्तद्विधिरिति न तत्रापि भेदप्रसक्तिः पूर्ववाक्ये च देशकालयोः कर्मणोऽनुवादे वा घलो
क्तिः कर्मस्वरूपाभिप्रायेणेति न तद्विरोधः एकस्मिन्नपि वाक्ये एकस्यैव कर्मणो विध्यनुवादयोर्हि सन्नि
प्रयोगविषयभेदेनोपपत्तेः प्रयोजनं पौर्णमास्यादिवाक्येषु कर्मान्तरविधायकमोघिवं सिद्धान्ते तु न
दभावः इति स्फुटं एतयेति वाक्यस्य कर्मान्तरविधायकत्वे तस्मिन्नु कर्मणि अव्यक्ततया सोमिकध
र्मप्राप्तेरन्याघकामेन सोमहविष्कोयागः कर्तव्यः सिद्धान्ते त्वाग्नेयादिहविष्काविधिरेवेति सूत्रे
विभागात्त्विपरिवृत्तेः॥ ॥ आग्नेय॥ ॥ अच्युतः सान्नाय्यवत्काद्याचित्को न भवतीत्यर्थः उभयप
त्रेति अमावास्यापौर्णमास्योरित्यर्थः ननु तत्रेति समिधो यजतीत्याद्यभ्यासस्थल इत्यर्थः अविशे
षाद्धि हमेवोपपाद्य पुन्निपौर्णमास्याधिकारेति उत्पत्तिशिष्टगुणावरोधात् केवलामावास्याकालयु
क्तवाक्ये सन्नकर्मानुवादेन कालद्वययुक्तवाक्ये पौर्णमासकालविध्यनुपपत्तेः कालद्वयवाक्य
मेव विधिरित्यवधारणान्नाविपर्यय इत्यर्थः प्राथम्यं पाठप्रयुक्तं कस्यचिद्वर्जनीयमिति मनतो

नहीति ३

शा०दी० विशेषग्रहणं त्वस्वरसादाह किं चेति कालद्वयसंयुक्तवाक्ये कालभेदादाग्नेययागद्वयं प्रतीयत इति या
६२ गभेदमाश्रित्य कोऽप्यन्तरमाह किं चेति कर्मण इति कालद्वयविहितस्यैक कालयुक्तगुणमेव प्रत्यभिज्ञा
नादित्यर्थः ऐन्द्राग्नस्येति अमावास्यायां केवलाग्नेयोऽपि प्रयत्नः किमुत तेन सहितमाग्नेदैवत इति प्र
शंसार्थं सत्यर्थः। अत एव न विधिः ननु तर्हि विधिपुनः श्रुतिरूपोऽभ्यासः नापि विशेषाग्रहः ऐन्द्राग्नस्या
वकृतया एककालवाक्यस्यानुवादत्वावधारणात् प्रत्यभिज्ञाबाधितत्वेन सन्निधानोद्देककर्मान्तर
मिति शङ्कां न्यायाभिदेशात्संगतिः स्पष्टयितुं सूत्रे आग्नेयोऽमावास्यायामावर्तनीयः अभ्यासस्य क
र्मभेदकत्वस्योक्तत्वेनामावास्यायामाग्नेयद्वयापत्तिरग्न्यादिनिभेदे न प्रतीयत इति वाच्ये संप्रति पञ्चदे
वताकत्वाद्यागभेदेऽपि तन्त्रेणानुष्ठानादनुष्ठानभेदो नास्तीति शंकां निराकर्तुं यागद्वयस्य तन्त्रेणा
नुष्ठाने पुरोडाशद्वयं कार्यमिति प्रयोजनप्रदर्शनार्थं चाभ्यासे न प्रतीयेत इत्युक्तं॥ ॥इति श्रीचं श्रीः एम्ः
द्रकनाथकृतौ भाट्टदीपिकाव्याख्याने प्रकाशाख्याने द्वितीयस्याध्यायस्य तृतीयः पादः ३ ६२
यावज्जीवं भवो यावज्जीविकः स किं कर्मार्थ उत पुरुषार्थः तदर्थं च किमयमभ्यासात्मकः उत नि